उच्चतरमाध्यमिकपाठ्यक्रमः

# संस्कृतम्

## ऐच्छिकम् - शास्त्रम्

## एकादशः वर्गः

# HIGHER SECONDARY COURSE

# SANSKRIT

## OPTIONAL - SASTRA

## XI

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2026

# राष्ट्रगीतम्

जन-गण-मन-अधिनायक जय हे
भारत-भाग्य-विधाता
पंजाब-सिंधु-गुजरात-मराठा
द्राविड़-उत्कल-बंगा
विंध्य-हिमाचल-यमुना-गंगा
उच्छल-जलधि-तरंगा
तव शुभ नामे जागे, तव शुभ
आशिष मांगे,
गाहे तव जय-गाथा ।
जन-गण-मंगल-दायक जय हे
भारत भाग्य विधाता ।
जय हे, जय हे, जय हे,
जय जय जय जय हे ।

# प्रतिज्ञा

भारतं मम राष्ट्रम् । सर्वे भारतीयाः मे भ्रातरः । अहं मम राष्ट्रे स्निह्यामि । तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि । तद्योग्यतां सम्पादयितुं सदा यतिष्ये च । अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च । विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च । मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम् । राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि ।

*Prepared by*

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
*Website : www.scertkerala.gov.in*
*e-mail : scertkerala@gmail.com, Phone : 0471 - 2341883,*
*Typesetting and Layout : SCERT*
*First Edition : 2026*
*Printed at : Centre for Advanced Printing and Training (C- apt),*
*Thiruvananthapuram-695013*

*© Department of General Education, Government of Kerala*

*ISBN 978-93-47213-91-5*

प्रियच्छात्राः,

एकादशवर्गे संस्कृतम् ऐच्छिकभाषारूपेण अधीयानानां भवतां पुरतः संस्कृतशास्त्रं पाठ्यपुस्तकम् इदं प्रस्तूयते। राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षणपरिषदा (NCERT) निर्दिष्टां पाठ्यपद्धतिम् अनुसृत्य राज्यस्तरीयं साहचर्यं च परिगणय्य एव अस्मिन् पाठभागाः निर्धारिताः। पाठ्यांशानां सम्यगवबोधनार्थम् आवश्यकं लघुव्याख्यानमपि अत्र आयोजितम्। अध्ययनोपकारकाणि अभ्यासकार्याणि च अस्मिन् समाकलितानि।

तत्तद्विषये प्रवीणानां कलाशालाध्यापकानाम् अन्येषां शिक्षाशास्त्रज्ञानां च नेतृत्वे राज्य-शैक्षिक-अनुसन्धान-प्रशिक्षणपरिषदा (SCERT) समायोजितायां कर्मशालायामेव पुस्तकस्यास्य सम्पादनं कृतम्। सूचनाप्रौद्योगिकोपाधयः (ICT) राष्ट्रिय-कौशल-योग्यता-प्रारूपं (NSQF) नूतनपठनतन्त्राणि च पुस्तकेऽस्मिन् परिगणितानि सन्ति।

स्वतन्त्रवाचनाय स्वतन्त्रचिन्तायै शास्त्रावबोधाय विशकलनात्मकचिन्तायै सर्गवैभवाय च अवसराः पुस्तकेऽस्मिन् समाकलिताः। अस्मिन् चत्वारि एककानि सन्ति। तत्र प्रथमं द्वितीयं च एककं व्याकरणाध्ययनार्थं तथा तृतीयं चतुर्थं च दर्शनाध्ययनार्थं परिकल्पितम्।

पाठपुस्तकमिदम् उद्दिष्टं कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे।

भवदीयः

**डा. जयप्रकाश् आर् के**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXT BOOK DEVELOPMENT COMMITTEE

### XI - SANSKRIT OPTIONAL - SASTRA

**Advisor**

**V. Madhavan Pillai**, Associate Professor & HoD Sanskrit (Rtd.),
Govt. College for Women, Thiruvananthapuram

**Chairperson**

**N. K. Ramachandran,** DEO (Rtd.) Wayanad.

**Expert**

**Dr. Asok kumar N. K**, Professor & Head of the Dept. of Nyaya,
Govt. Sanskrit College, Thiruvananthapuram.

**Participants**

**Asokan P K**, HSST(Jr.) Sanskrit, SRMGHSS Ramnagar, Kasargod.

**Muhammed Sheri A**, HSST Sanskrit, GHSS Sasthamkotta, Kollam.

**Sankara Narayanan R M**, HSST Sanskrit (Rtd.) Govt Sanskrit HSS Tripunithura, Ernakulam.

**Sindhu B Kunnath**, HSST Sanskrit, Govt Sanskrit HSS Tripunithura, Ernakulam.

**Suresh Kumar K**, HSST (Jr) Sanskrit, NSS HSS Kavalam, Alappuzha.

**Unnikrishnan Nair S**, HST Sanskrit (Rtd.) Govt. HSS Kizhakkenchery, Palakkad.

**Typesetting & Layout**

**Manoj P G**, JLT (Sanskrit) SGUPS Venmony, Idukki.
**Dr. Sudha A**, JLT (Sanskrit) PSMGMUPS Muttathara, Thiruvananthapuram.

**Artists**

**Murukan Achari K**, Drawing Teacher, BRC, Nedumangad.
**Adithyan S,** Nellimoodu, Thiruvananthapuram.
**Gijo Soman**, Panthalam, Pathanamtitta.

### ACADEMIC CO-ORDINATORS

**V.Sreekantan, Research Officer in Sanskrit, SCERT Kerala**
**Dr. Ajeesh P.T, Research Officer (I/C of Sanskrit), SCERT Kerala**


**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्**
**State Council of Educational Research and Training, Kerala**

# विषयानुक्रमणिका

## प्रथमो भागः


| एककम् | | पाठः | पुटसंख्या |
|---|---|---|---|
| १. व्याकरणप्रक्रमः | १ | मुनित्रयम् | 7 - 14 |
| | २ | संज्ञा | 15 - 28 |
| २. व्याकरणप्रक्रिया | ३ | अच् सन्धिः | 29 - 39 |
| | ४ | हल् सन्धिः | 40 - 45 |
| | ५ | विसर्गसन्धिः | 46 - 60 |


## द्वितीयो भागः


| एककम् | | पाठः | पुटसंख्या |
|---|---|---|---|
| ३. दर्शनसोपानम् | ६ | आस्तिकदर्शनानि भागः १ | 61 - 66 |
| | ७ | आस्तिकदर्शनानि भागः २ | 67 - 69 |
| | ८ | नास्तिकदर्शनानि | 70 - 77 |
| ४. तर्कशास्त्रम् | ९ | पदार्थपरिचयः | 78 - 88 |
| | १० | प्रमाणपरिचयः | 89 - 100 |

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാ നിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണ ഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

प्रथमः भागः
(व्याकरणम्)

# एककम् १

## व्याकरणप्रक्रमः

**आमुखम्**

प्रथमेऽस्मिन् एकके द्वौ पाठौ स्तः। व्याकरणघटनायाः आचार्याणां ग्रन्थानां च परिचायनाय प्रथमः पाठः निर्मितः। द्वितीये पाठे माहेश्वरसूत्राणि संज्ञासूत्राणि च विशदीकृतानि ।

पाठः - १

# मुनित्रयम्

**पाठप्रवेशः**

अक्षरं न क्षरं विद्यात् – इति श्रुतं वा ? यत् न नश्यति - न क्षीयते- तद् अक्षरम् । अक्षरेण व्याप्ता भवति भाषा । शुद्धा भाषा व्याकरणे अधिष्ठिता । संस्कृतभाषायाः व्याकरणं प्रसिद्धम् । तत्रापि मुनित्रयस्य प्राधान्यम् अवितर्कितमेव । तान् मुनीन् अधिकृत्य पठामः ।

**आमुखम्**

व्याकरणशास्त्रे पाणिनिः कात्यायनः पतञ्जलिः इति मुनित्रयस्य परिचायनम् अनेन पाठेन उद्दिश्यते । एवं प्रसिद्धानां ग्रन्थानां केवलपरिचायनमपि भवति । व्याकरणपिपठिषुभिः अवश्यम् अवगन्तव्योऽयं विषयः । अतः सूत्रं, वार्त्तिकं, भाष्यम् इत्येतेषां लक्षणानि अत्र प्रदत्तानि । लघुसिद्धान्तकौमुदीम् आधारीकृत्य अत्र पाठभागः संयोजितः इत्यतः सिद्धान्तकौमुदीप्रभृतीनां ग्रन्थानां परिचायनमपि अत्र कृतम् ।

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।

पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

पाणिनिः कात्यायनः पतञ्जलिः इति त्रयः आचार्याः मुनित्रयम् इति व्यपदिश्यन्ते ।

**अष्टाध्यायी - पाणिनिः**

संस्कृतव्याकरणस्य आधारग्रन्थो भवति अष्टाध्यायी । पाणिनिना विरचितत्वात् पाणिनीयम् इत्यपि नाम्ना ग्रन्थोऽयं प्रसिद्धः । अष्टौ अध्यायाः सन्तीत्यतः अयम् अष्टाध्यायी । प्रत्यध्यायं चत्वारः पादाः । चतुर्दश माहेश्वरसूत्राणि आधारीकृत्य अष्टाध्यायी रचितः । सूत्ररूपेण भवति ग्रन्थस्यास्य शैली ।

सूत्रलक्षणम् -

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।। इति ।

मिताक्षरयुक्तं सन्देहातीतम् अर्थगर्भं सर्वतोमुखं व्याप्यमानम् अतिव्याप्तिरहितम् अत्याज्यम् इति शब्दतत्त्वविदः सूत्रलक्षणम् आहुः ।

**वार्त्तिकम् – कात्यायनः**

पाणिनीयसूत्राणां वार्त्तिकं आचार्येण कात्यायनेन रचितम् । कात्यायनः वररुचिः इति नाम्नापि प्रसिद्धः । अपि च स वैदिकः वैयाकरणः गणितज्ञः इति च प्रसिद्धः भवति ।

वार्त्तिकलक्षणम् -

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञाः मनीषिणः ।। इति

तथा हि उक्तानुक्तदुरुक्तार्थव्यक्तिकारकग्रन्थः भवति वार्त्तिकग्रन्थः ।

*उक्तानाम्, अनुक्तानां, दुरुक्तानां, च विषयाणां स्पष्टता वार्त्तिकेन लभ्यते ।*

**महाभाष्यम् – पतञ्जलिः**

पाणिनीयसूत्राणि तत्र कात्यायनेन रचितं वार्त्तिकं चाधारीकृत्य मुनिना पतञ्जलिना व्याकरणमहाभाष्यं रचितम् । सूत्राणि वार्त्तिकं च परिगणय्य रचितं व्याख्यानम् अथवा भाष्यम् इत्यतः इदं महाभाष्यमित्युच्यते। पतञ्जलिमहर्षिः क्रिस्तोः पूर्वं द्वितीये शतके जिजीव इति इतिहासकाराणां मतम् । तेनैव योगसूत्राणि च रचितानि इति विश्वस्यते।

भाष्यलक्षणं –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वमतानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।। इति ।

यत्र सूत्रानुसारिभिः वाक्यैः सूत्रार्थः वर्ण्यते (तथा च) स्वमतानि च वर्ण्यन्ते तत्र भाष्यमिति भाष्यविदः आहुः।

अष्टाध्यायी, वार्त्तिकं, महाभाष्यम् इत्येते ग्रन्थाः संस्कृतव्याकरणस्य प्रामाणिकाः भवन्ति ।

पाणिनीयव्याकरणस्य व्याख्यानरूपेण नैके ग्रन्थाः कालान्तरे रचिताः। तेषु प्रसिद्धः जनप्रियश्च ग्रन्थो भवति श्रीमता भट्टोजिदीक्षितेन विरचितः वैयाकरणसिद्धान्तकौमुदी । व्याकरणपिपठिषूणां सौकर्याय प्रक्रियानुसारं रचितः अयं ग्रन्थः छात्राणां बहूपकारको भवति। वैयाकरणसिद्धान्तकौमुद्याः संक्षिप्तरूपः ग्रन्थः भवति लघुसिद्धान्तकौमुदी। ग्रन्थोऽयं वरदराजाचार्येण रचितः। पाणिनीयव्याकरणे अवश्यं ग्रहणीयः विषयः लघुरूपेण ललितया रीत्या ग्रन्थेऽस्मिन् प्रतिपादितो वर्तते ।

केरलीयेन मेल्पुत्तूर् नारायणभट्टपादेन विरचितं प्रक्रियासर्वस्वम् इति ग्रन्थः सिद्धान्तकौमुदीवत् प्रक्रियानुसारं वर्तते। लघुसिद्धान्तकौमुद्याः बालहितैषिणी व्याख्यानं प्रो. आर्. वासुदेवन् पोट्टिमहोदयेन विरचितम्। पाणिनीयप्रद्योतं नाम ग्रन्थः ऐ.सि. चाक्कोमहोदयेन विरचितः। प्रक्रियाभाष्यं नाम ग्रन्थः फादर् जोण् कुन्नप्पल्लिमहोदयेन विरचितः। ओ. के. मुन्षिमहोदयेन विरचितं ग्रन्थद्वयम् अस्ति बृहद्धातुरूपावली तद्धितकोशः च । पि. एस्. अनन्तनारायणशास्त्रिमहोदयस्य वाक्यतत्त्वं राजर्षि रामवर्मणः बालबोधनं कैक्कुलङ्ङर रामवार्यर्महोदयस्य पदसंस्कारचन्द्रिका च केरलीयव्याकरणग्रन्थाः।

महेश्वरेण पाणिनये ढक्कानिनादरूपेण प्रदत्तानि चतुर्दश सूत्राणि अक्षरसमाम्नायः अथवा प्रत्याहारसूत्राणि इति कथ्यन्ते । १४ माहेश्वरसूत्रेषु ४२ अक्षराणि पाणिनिना समाकलितानि । वर्णमालालेखने **आ ई ऊ ॠ** इत्येतानि दीर्घाक्षराणि च संयोज्य ४६ अक्षराणि सन्ति ।

| | |
|---|---|
| स्वराः (अचः) | अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ |
| अनुस्वारः | अं ( ं ) |
| विसर्गः | अः ( : ) |

## व्यञ्जनानि (हलः)

| | वर्गः | खरम् | अतिखरम् | मृदुः | घोषम् | अनुनासिकम् |
|---|---|---|---|---|---|---|
| स्पर्शाः | कवर्गः | क | ख | ग | घ | ङ |
| | चवर्गः | च | छ | ज | झ | ञ |
| | टवर्गः | ट | ठ | ड | ढ | ण |
| | तवर्गः | त | थ | द | ध | न |
| | पवर्गः | प | फ | ब | भ | म |

| | | | | |
|---|---|---|---|---|
| अन्तःस्थाः | य | र | ल | व |
| ऊष्माणः | श | ष | स | ह |

| | |
|---|---|
| जिह्वामूलीयौ | ᳵक ᳵख |
| उपध्मानीयौ | ᳶप ᳶफ |

संस्कृतभाषायां सामान्यप्रयोगानां परिचयः ।

| **त्रीणि वचनानि** | | |
|---|---|---|
| **वचनम्** | **उदाहरणम्** | **अर्थः** |
| एकवचनम् | वृक्षः | One tree |
| द्विवचनम् | वृक्षौ | Two trees |
| बहुवचनम् | वृक्षाः | Three or more trees |

| **त्रीणि लिङ्गानि** | | | |
|---|---|---|---|
| लिङ्गम् | उदाहरणम् | | |
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| पुल्लिङ्गम् | वृक्षः | वृक्षौ | वृक्षाः |
| स्त्रीलिङ्गम् | लता | लते | लताः |
| नपुंसकलिङ्गम् (क्लीबम्) | फलम् | फले | फलानि |

| सप्तविभक्तयः सन्ति । | | | | | |
|---|---|---|---|---|---|
| विभक्तयः | कारकाणि | Case | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | कर्तृकारकम् | Nominative | बालः | बालौ | बालाः |
| द्वितीया | कर्मकारकम् | Accusative | बालम् | बालौ | बालान् |
| तृतीया | करणकारकम् | Instrumental | बालेन | बालाभ्याम् | बालैः |
| चतुर्थी | सम्प्रदानकारकम् | Dative | बालाय | बालाभ्याम् | बालेभ्यः |
| पञ्चमी | अपादानकारकम् | Ablative | बालात् | बालाभ्याम् | बालेभ्यः |
| षष्ठी | सम्बन्धः | Genetive | बालस्य | बालयोः | बालानाम् |
| सप्तमी | अधिकरणकारकम् | Locative | बाले | बालयोः | बालेषु |

| त्रयः पुरुषाः | | | | | |
|---|---|---|---|---|---|
| **पुरुषः** | **कर्ता** | **Person** | **प्रयोगः** | | |
| | | | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सः | Third person (He) | सः गच्छति | तौ गच्छतः | ते गच्छन्ति |
| | सा | Third person (She) | सा गच्छति | ते गच्छतः | ताः गच्छन्ति |
| | तत् | Third person (It) | तत् गच्छति | ते गच्छतः | तानि गच्छन्ति |
| मध्यमपुरुषः | त्वम् | Second person (You) | त्वं पठसि | युवां पठथः | यूयं पठथ |
| उत्तमपुरुषः | अहम् | First person (I) | अहं पठामि | आवां पठावः | वयं पठामः |

## पठनप्रवर्तनानि

- **मुनित्रयमधिकृत्य चर्चां नयतु ।**

  श्रद्धेयाः अंशाः –
  - चर्चासूचकानां निर्णयः
  - मुनीनां ग्रन्थानां च परामर्शः
  - भागभाक्त्वम्

- **सूत्रलक्षणं वदतु ।**

  श्रद्धेयाः अंशाः –
  - अर्थबोधः
  - क्रमशः कथनम्
  - स्फुटता

- **वार्त्तिकमधिकृत्य लघुटिप्पणीं लिखतु ।**

  श्रद्धेयाः अंशाः –
  - संघे चर्चा
  - क्रमशः लेखनम्
  - समग्रता

- **महाभाष्यं पतञ्जलिं चाधिकृत्य विवरणं लिखतु ।**

  श्रद्धेयाः अंशाः –
  - पाठभागं पठित्वा सूचकानां चयनम्
  - संघे चर्चां कृत्वा निर्णयः
  - क्रमशः लेखनम्

- **व्याकरणग्रन्थानां पट्टिकां रचयतु ।**

  श्रद्धेयाः अंशाः –
  - पाठभागानां सम्यक् वाचनं करणीयम् ।
  - ग्रन्थानां तत्कर्तॄणां च परामर्शः ।
  - पट्टिकायां निवेशनम्

- **केरलीयवैयाकरणानां ग्रन्थान् विविच्य लिखतु ।**

  श्रद्धेयाः अंशाः –
  - पाठभागानां सम्यक् वाचनम्
  - केरलीयानाम् अन्येषां च वैयाकरणानां परिचयः ।
  - विविच्य लेखनम्

- **माहेश्वरसूत्राणि कक्ष्यायां प्रस्तौतु ।**

  श्रद्धेयाः अंशाः –
  - क्रमशः कथनम्
  - अक्षरस्फुटता
  - तालात्मककथनम्

- **वर्णमाला पट्टिकायां लिखतु ।**

  श्रद्धेयाः अंशाः –
  - स्वराणां व्यञ्जनानां च विवेचनम्
  - क्रममनुसृत्य लेखनम्
  - पट्टिकायां निवेशनम्

- **वाक्येभ्यः विभक्तिलिङ्गवचनानुसारं पदानि चिनोतु ।**

  श्रद्धेयाः अंशाः –
  - विभक्तीनां लिङ्गानां वचनानां च अवबोधः
  - वाक्येभ्यः तेषां चयनसामर्थ्यम्
  - टिप्पणी पुस्तके लेखनम्

**अधोदत्ताद् वाक्यात् विभक्त्यनुसारं पदानि विविच्य लिखतु ।**

विद्यालयस्य प्रांशुपालः निदेशालयात् स्वीकृतं प्रमाणपत्रं छात्रपटवे अरविन्दाय विद्यालयसभायां स्वहस्तेन ददाति ।

# संज्ञा

## प्रवेशकप्रवर्तनम्

सामाजिकमाध्यमेषु प्रसिद्धानि अधोलिखितानि पदानि पठतु। पोस्ट् (Post), स्टोरी (Story), स्टाट्टस् (Status), न्यूस्फीड् (Newsfeed), चाट्(Chat), रील्स् (Reels) ...... एतेषां पदानामर्थं सामाजिकमाध्यमेभ्यः इतरत्र कथं भिद्यते इति चर्चां कुरु।)

## आमुखम्

अत्र संज्ञापदस्य नाम अथवा आख्या इत्यर्थः। शास्त्रग्रन्थेषु पारिभाषिकपदानि बहूनि सन्ति। कदाचित् तेषामर्थाः प्रतिशास्त्रं भिन्नाः स्युः। व्याकरणशास्त्राध्ययनात् पूर्वं तस्मिन् शास्त्रे प्रयुक्तानि पारिभाषिकपदानि परिचिनुमः। व्याकरणशास्त्रम् अक्षरसमाम्नायाधीनं भवति। तत्र वर्णानां प्राधान्यं विद्यते। अतः आचार्येण पाणिनिना तानि अक्षराणि सूत्रेषु ग्रथितानि। तानि माहेश्वरसूत्राणि इति प्रसिद्धानि। महेश्वरादागतं माहेश्वरम्। ब्रह्मणः मानसपुत्राः भवन्ति सनकादयः। सनकः सनन्दनः सनातनः सनत्कुमारश्च सनकादिना व्यवह्रियन्ते। तेषाम् उद्बोधनाय महेश्वरः स्वकीयां ढक्कां चतुर्दशवारं निनाद। तान् ध्वनीन् अक्षरत्वेन स्वीकृत्य पाणिनिः माहेश्वरसूत्राणि प्रणीतवान्।




नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

(नन्दिकेशः)

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ।।

(वरदराजाचार्यः)

**माहेश्वरसूत्राणि**

| | | | | |
|---|---|---|---|---|
| **अइउण्** | **ऋऌक्** | **एओङ्** | **ऐऔच्** | **हयवरट्** |
| **लण्** | **ञमङणनम्** | **झभञ्** | **घढधष्** | **जबगडदश्** |
| **खफछठथचटतव्** | | **कपय्** | **शषसर्** | **हल्** |

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः ।

हकारादिष्वकारः उच्चारणार्थः । लण्मध्येत्वित्संज्ञकः ।

टिप्पणी - अन्वयः - अहं शुद्धां गुण्यां सरस्वतीं देवीं नत्वा पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीं करोमि । पदच्छेदः - सूत्राणि + अणादि, हकारादिषु + अकारः । तु + इत्संज्ञकः ।

महेश्वरादागतं माहेश्वरम् । तानि माहेश्वराणि ।

अणादि संज्ञार्थानि - अण् , अक्, अच् ....... इत्यादि संज्ञार्थानि । एतादृशाः ४२ संज्ञाः पाणिनिना स्वीकृताः ।

हकारादिष्वकारः उच्चारणार्थः - 'हयवरट्' इत्यादिषु – ह् अ, य् अ, व् अ, र् अ, ट् इति क्रमेण व्यञ्जनेन सहितः अकारः सुखोच्चारणार्थः इत्यर्थः ।

लण्मध्ये ... – लण् सूत्रस्य मध्ये स्थितः (ल् (अ) ण् ) अकारः न केवलम् उच्चारणार्थः अपि तु इत् संज्ञकश्च भवति ।

## इत्संज्ञा

इत्संज्ञाविधायकं सूत्रम् –

*सूत्रम्* - **हलन्त्यम् । १-३-३**

वृत्तिः - उपदेशे अन्त्यं हल् इत् स्यात् । उपदेश आद्योच्चारणम् ।
हल् अन्त्यम् इति पदच्छेदः । अनेन सूत्रेण इत् संज्ञा विधीयते ।
सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ।

**टिप्पणी** - उपदेश आद्योच्चारणम् । 'उपदेशः' इति शब्देन आद्यमहर्षीणाम् (महेश्वर-पाणिनि-कात्यायन-पतञ्जलि-इत्येतेषाम्) उच्चारणस्य निर्देशः भवति । तेषामुच्चारणम् आद्योच्चारणम् ।

तथा च – धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशाः उपदेशाः प्रकीर्तिताः ।।

धातुपाठः, सूत्रपाठः, गणपाठः, उणादिपाठः, वार्त्तिकपाठः, लिङ्गानुशासनम् - एतेषु ग्रन्थेषु पाठिताः

शब्दाः, तथा च आदेशाः, आगमाः, प्रत्ययाः - एते सर्वे (तेषाम् मूलस्वरूपे) 'उपदेशः' नाम्ना ज्ञायन्ते — इति अस्याः कारिकायाः अर्थः । सर्वाणि माहेश्वरसूत्राणि उपदेशसंज्ञकानि सन्ति । अतः माहेश्वरसूत्रेषु अन्त्ये भवाः ण्-क्-ङ् आदयः हलन्त्यम् इति सूत्रेण इतः इति विधीयन्ते ।

- यथा - अइउण् इत्यत्र णकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा ।
- सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र - अत्र हलन्त्यम् इति सूत्रस्य वृत्यर्थम् 'उपदेशः' 'इत्' इति पदद्वयम् आवश्यकम् । तत् उपदेशेऽजनुनासिक इत् (१.३.२) इति पूर्वसूत्रात् अनुवर्तितम् ।)

सूत्रं षड्विधम् - संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।

## लोपसंज्ञा

लोपसंज्ञाविधायकं सूत्रं –

*सूत्रम्* - **अदर्शनं लोपः १-१-६०**

वृत्तिः – प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात् ।
अदर्शनं लोपः इति द्विपदं सूत्रम् । अनेन सूत्रेण लोपसंज्ञा विधीयते ।

इत्संज्ञकानां लोपविधायकं सूत्रं -

सूत्रम् – **तस्य लोपः १-३-९**

वृत्तिः – तस्य इतो लोपः स्यात् ।
तस्य लोपः इति द्विपदं सूत्रम् । अनेन सूत्रेण इतां लोपो विधीयते ।
णादयोऽणाद्यर्थाः ।

**टिप्पणी** - अदर्शनं लोपः - लोपसंज्ञा - वर्णस्य वर्णसमूहस्य वा जायमानम् अदर्शनम् लोपसंज्ञया निर्दिश्यते । प्रक्रियायाः प्रारम्भिकसोपानेषु अयं वर्णः (समूहः वा) दृश्यते, परन्तु लोपे कृते तस्य दर्शनम् न भवति, इति अत्र आशयः ।

तस्य लोपः - इत्संज्ञा प्राप्तानां वर्णानां लोपो भवति । यथा - अइउण् इत्यत्र णकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे अइउ इति ग्राह्यः । अतः माहेश्वरसूत्रेषु इतं विहाय अ इ उ, ऋ लृ, ए ओ, ऐ औ, ह य व र, ल, ञ म ङ ण न, झ भ, घ ढ ध, ज ब ग ड द, ख फ छ ठ थ च ट त, क प, श ष स, ह, इत्येते वर्णाः ग्राह्याः ।

णादयोऽणाद्यर्थाः – चतुर्दशमाहेश्वरसूत्रेषु अन्त्यस्थाः इतः यद्यपि लुप्यन्ते तथापि तेषामुपदेशः अण् अक् अच् इत्यादि प्रत्याहारार्थं कृतः ।

प्रत्याहारसंज्ञाविधायकं सूत्रम् –

## प्रत्याहारसंज्ञा

*सूत्रम्* – **आदिरन्त्येन सहेता १-१-७१**

वृत्तिः – अन्त्येन इता सहितः आदिः मध्यगानां स्वस्य च संज्ञा स्यात्।

आदिः अन्त्येन सह इता इति पदच्छेदः। अनेन सूत्रेण प्रत्याहारसंज्ञा विधीयते।

यथा अण् इति अ इ उ वर्णानां संज्ञा । एवं हल्, अल् इत्यादयः।

**टिप्पणी** - प्रत्याह्रियन्ते (संक्षिप्यन्ते ) वर्णाः अनेन इति प्रत्याहारः ।

| आदिरन्त्येन सहेता इति सूत्रेण **इक्** इति संज्ञासिद्धिः । | | |
|---|---|---|
| **प्रश्नः** | **उत्तरम्** | **उदाहरणम् (इक्)** |
| कीदृशः आदिः संज्ञा स्यात् ? | अन्त्येन इता सहितः आदिः | इक् इति संज्ञा |
| केषां वर्णानां संज्ञा स्यात् ? | मध्यगानाम् | उ ऋ ऌ |
| पुनः कस्य च संज्ञा स्यात् ? | स्वस्य च (आदेः) - इकारस्य | इ |
| तथा इक् इति इ उ ऋ ऌ वर्णानां संज्ञा । | | |

| आचार्यैःस्वीकृताः द्विचत्वारिंशत् (४२) प्रत्याहाराः। | | | | | |
|---|---|---|---|---|---|
| अक् | अश् | ऐच् | जश् | भष् | रल् |
| अच् | इक् | खय् | झय् | मय् | वल् |
| अट् | इच् | खर् | झर् | यञ् | वश् |
| अण् | इण् | ङम् | झल् | यण् | शर् |
| अण् | उक् | चय् | झश् | यम् | शल् |
| अम् | एङ् | चर् | झष् | यय् | हल् |
| अल् | एच् | छव् | बश् | यर् | हश् |

स्यादेको ङ्ञणवटै षेणद्वौ त्रय इह कणाभ्याम्।

चत्वारश्च चमाभ्यां पञ्चयराभ्यां शलाभ्यां षट्॥

र इति प्रत्याहारोऽपि भट्टोजिदीक्षितेन स्वीकृतः। (र = र् ल्)

---

ह्रस्वदीर्घप्लुतसंज्ञाविधायकं सूत्रम् –

## ह्रस्वदीर्घप्लुतसंज्ञा

**सूत्रम् – ऊकालोऽज्झ्रस्वदीर्घप्लुतः१-२-२७**

वृत्तिः - उश्च ऊश्च ऊ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्।

ऊकालः अच् ह्रस्वदीर्घप्लुतः इति पदच्छेदः । अनेन सूत्रेण ह्रस्वदीर्घप्लुतसंज्ञा विधीयते ।
स प्रत्येकम् उदात्तादिभेदेन त्रिधा-

**टिप्पणी -** ह्रस्वश्च दीर्घश्च प्लुतश्च एषां समाहारः ह्रस्वदीर्घप्लुतः । एवम् एकमात्रः अच् ह्रस्वः, द्विमात्रः दीर्घः, त्रिमात्रः प्लुतश्च भवति इति आशयः ।

१. ह्रस्वः — यस्य स्वरस्य उच्चारणकालः **उ** इत्यस्य उच्चारणकालसदृशः (एकमात्रिकः) अस्ति, सः स्वरः ह्रस्वः इति नाम्ना ज्ञायते । अ इ उ ऋ ऌ एते स्वराः ह्रस्वसंज्ञकाः सन्ति ।
२. दीर्घः — यस्य स्वरस्य उच्चारणकालः **ऊ** इत्यस्य उच्चारणकालसदृशः (द्विमात्रिकः) अस्ति, सः स्वरः दीर्घः इति नाम्ना ज्ञायते । आ ई ऊ ॠ ए ऐ ओ औ एते स्वराः दीर्घसंज्ञकाः सन्ति ।
३. प्लुतः — यस्य स्वरस्य उच्चारणकालः **उ३** इत्यस्य उच्चारणकालसदृशः (त्रिमात्रिकः, ततोऽधिकः वा) अस्ति, सः स्वरः प्लुतः इति नाम्ना ज्ञायते । अ३ इ३ उ३ ऋ३ ऌ३ ए३ ऐ३ ओ३ औ३ एते स्वराः प्लुतसंज्ञकाः सन्ति । अस्मिन् विषये एका कारिका अपि प्रसिद्धा वर्तते -

एकमात्रो भवेत् ह्रस्वः, द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयः, व्यञ्जनं त्वर्धमात्रिकम् ॥

ह्रस्व-दीर्घ-प्लुत-संज्ञाः स्वराणामेव विद्यन्ते, न हि व्यञ्जनानाम् । सर्वाणि व्यञ्जनानि तु अर्धमात्रिकानि एव सन्ति ।

स प्रत्येकम् – ह्रस्वः प्रत्येकम् उदात्त अनुदात्त स्वरित भेदेन त्रिधा । एवं दीर्घः प्लुतः च ।

## उदात्तसंज्ञा

उदात्तसंज्ञाविधायकं सूत्रम् –

*सूत्रम्* – **उच्चैरुदात्तः १-२-२९**

वृत्तिः – ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नोऽच् उदात्तसंज्ञः स्यात् ।
उच्चैः उदात्तः इति पदच्छेदः । अनेन सूत्रेण उदात्तसंज्ञा विधीयते ।

## अनुदात्तसंज्ञा

अनुदात्तसंज्ञाविधायकं सूत्रम् –

*सूत्रम्* – **नीचैरनुदात्तः १-२-३०**

वृत्तिः – ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नोऽच् अनुदात्तसंज्ञः स्यात् ।

## स्वरितसंज्ञा

स्वरितसंज्ञाविधायकं सूत्रम् –

*सूत्रम्* – **समाहारः स्वरितः १-२-३१**

वृत्तिः – उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् ।

समाहारः स्वरितः इति द्विपदं सूत्रम् । अनेन सूत्रेण स्वरितसंज्ञा विधीयते ।

**टिप्पणी** - यस्य स्वरस्य उच्चारणं तस्य उच्चारणस्थानस्य ऊर्ध्वभागात् भवति, तस्य उदात्तः इति संज्ञा भवति।

यस्य स्वरस्य उच्चारणं तस्य उच्चारणस्थानस्य अधोभागात् भवति, तस्य अनुदात्तः इति संज्ञा भवति।

यस्य स्वरस्य उच्चारणं तस्य उच्चारणस्थानस्य उर्ध्वभागम् अधोभागम् च प्रयुज्य भवति, तस्य स्वरित: इति संज्ञा भवति ।

एवं ह्रस्वदीर्घप्लुतानां प्रत्येकं त्रयस्त्रयः भेदाः।

यथा - १. ह्रस्वोदात्तः, २. ह्रस्वानुदात्तः, ३. ह्रस्वस्वरितः, ४. दीर्घोदात्तः, ५. दीर्घानुदात्तः, ६. दीर्घस्वरितः, ७.प्लुतोदात्तः, ८. प्लुतानुदात्तः, ९. प्लुतस्वरितः इति।

स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा।

अनुनासिकसंज्ञाविधायकं सूत्रम् -

## अनुनासिकसंज्ञा

*सूत्रम्* – **मुखनासिकावचनोऽनुनासिकः १-१-८**

वृत्तिः - मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिकसंज्ञः स्यात्।
मुखनासिकावचनः अनुनासिकः इति पदच्छेदः। अनेन सूत्रेण अनुनासिकसंज्ञा विधीयते।

तदित्थम् - अ इ उ ऋ वर्णानां प्रत्येकम् अष्टादश भेदाः। ऌ वर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।

**टिप्पणी -**

यस्य वर्णस्य उच्चारणार्थं मुखेन (उच्चारणस्थानेन) सह नासिकायाः अपि प्रयोगः भवति, सः वर्णः अनुनासिकसंज्ञां प्राप्नोति।

सर्वेषां स्वराणाम् उच्चारणं नासिकया सह अपि कर्तुं शक्यते । तत् अनुनासिकम्। तथा नासिकया विना अपि कर्तुं शक्यते । तत् अननुनासिकम्।

यकार-वकार-लकार इति त्रयाणां व्यञ्जनानाम् उच्चारणम् अपि नासिकया सह तथा च नासिकया विना अपि सम्भवति ।

| अनुनासिकः | अननुनासिकः |
|---|---|
| यँ वँ लँ | य् व् ल् |

वर्गपञ्चमाः (ञ्, म्, ङ्, ण्, न्)— वर्गपञ्चमवर्णानाम् उच्चारणं नासिकया मिलितेन तत्तदुच्चारणस्थानेन सह भवत्येव । अतः सर्वे वर्गपञ्चमवर्णाः नित्यम् अनुनासिकसंज्ञकाः एव सन्ति । अनुस्वारः - अनुस्वारः इति संस्कृतभाषायां विद्यमानः पृथग् वर्णः अस्ति । अस्य उच्चारणं केवलं नासिकया एव भवति। अनुस्वारस्य उच्चारणे मुखस्य (उच्चारणस्थानस्य) प्रयोगः न क्रियते । अतः अनुस्वारस्य अनुनासिकः इति संज्ञा न भवति ।

| ह्रस्वभेदाः | दीर्घभेदाः | प्लुतभेदाः । |
|---|---|---|
| अ इ उ ऋ ऌ | आ ई ऊ ॠ ए ओ ऐ औ | अ३ इ३ उ३ ऋ३ ऌ३ ए३ ओ३ ऐ३ औ३ |
| १. ह्रस्वोदात्तानुनासिकः | ७. दीर्घोदात्तानुनासिकः | १३. प्लुतोदात्तानुनासिकः |
| २.ह्रस्वोदात्ताननुनासिकः | ८. दीर्घोदात्ताननुनासिकः | १४. प्लुतोदात्ताननुनासिकः |
| ३.ह्रस्वानुदात्तानुनासिकः | ९. दीर्घानुदात्तानुनासिकः | १५. प्लुतानुदात्तानुनासिकः |
| ४.ह्रस्वानुदात्ताननुनासिकः | १०. दीर्घानुदात्ताननुनासिकः | १६. प्लुतानुदात्ताननुनासिकः |
| ५. ह्रस्वस्वरितानुनासिकः | ११. दीर्घस्वरितानुनासिकः | १७. प्लुतस्वरितानुनासिकः |
| ६.ह्रस्वस्वरिताननुनासिकः | १२. दीर्घस्वरिताननुनासिकः | १८. प्लुतस्वरिताननुनासिकः |

## सवर्णसंज्ञा

सवर्णसंज्ञाविधायकं सूत्रम्।

*सूत्रम्* – **तुल्यास्यप्रयत्नं सवर्णम् १-१-९**

वृत्तिः – ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। तुल्यास्यप्रयत्नं सवर्णम् इति द्विपदं सूत्रम् । अनेन सूत्रेण सवर्णसंज्ञा विधीयते।

(१) अकुहविसर्जनीयानां कण्ठः।

(२) इचुयशानां तालु ।

(३) ऋटुरषाणां मूर्धा ।

(४) ऌतुलसानां दन्ताः।

(५) उपूपध्मानीयानाम् ओष्ठौ

(६) ञमङणनानां नासिका च ।

(७) एदैतोः कण्ठतालु ।



(८) ओदौतोः कण्ठोष्ठम् ।

(९) वकारस्य दन्तोष्ठम् ।

(१०) जिह्वामूलीयस्य जिह्वामूलम् ।

(११) नासिका अनुस्वारस्य ।

| वर्णाः | उच्चारणस्थानम् |
|---|---|
| अ क् ख् ग् घ् ङ् ह् विसर्गः | कण्ठः |
| इ च् छ् ज् झ् ञ् य् श् | तालु |
| ऋ ट् ठ् ड् ढ् ण् र् ष् | मूर्धा |
| ऌ त् थ् द् ध् न् ल् स् | दन्ताः |
| उ प् फ् ब् भ् म् उपध्मानीयः | ओष्ठौ |
| ञ् म् ङ् ण् न् | नासिका |
| ए ऐ | कण्ठतालु |
| ओ औ | कण्ठोष्ठौ |
| व् | दन्तोष्ठम् |
| जिह्वामूलीयः | जिह्वामूलम् |
| अनुस्वारः | नासिका |

**टिप्पणी -** आस्ये भवम् आस्यम् - ताल्वादिस्थानमित्यर्थः। प्रकृष्टो यत्नः प्रयत्नः। आभ्यन्तरयत्न इत्यर्थः। आस्यं च प्रयत्नः च आस्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम्।

यस्य वर्णस्य ताल्वादिस्थानम् आभ्यन्तरप्रयत्नः च इत्येतद्द्वयं यस्य वर्णस्य ताल्वादिस्थानेन आभ्यन्तरप्रयत्नेन च तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् इत्यर्थः ।

यत्नो द्विधा - आभ्यन्तरो बाह्यश्च।

आभ्यन्तरप्रयत्नः पञ्चधा ।

१. स्पृष्टः। २. ईषत्स्पृष्टः। ३. ईषद्विवृतः । ४. विवृतः। ५. संवृतः।

तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव । बाह्यप्रयत्नः विवारादि एकादशधा।

**टिप्पणी -** बाह्यप्रयत्नः एकादशधा। विवार-संवार-श्वास-नाद-घोष-अघोष-अल्पप्राण-महाप्राण-उदात्त-अनुदात्त-स्वरितभेदात् । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः।

कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः। शल ऊष्माणः । अचः स्वराः । ≍क ≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः । ≍प ≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ।

सवर्णग्राहकसूत्रम्।

## सवर्णस्य संज्ञा

*सूत्रम्* - **अणुदित्सवर्णस्य चाप्रत्ययः १-१-६९**

वृत्तिः – प्रतीयते-विधीयते इति प्रत्ययः। अविधीयमानः अण् उदित् च सवर्णस्य संज्ञा स्यात्। अत्रैव अण् परेण णकारेण। अण् उदित् सवर्णस्य च अप्रत्ययः इति पदच्छेदः । अनेन सूत्रेण सवर्णस्य संज्ञा विधीयते।

कु चु टु तु पु एते उदितः। तदेवम् – अ इति अष्टादशानां संज्ञा। तथा इकारः उकारश्च। ऋकारः त्रिंशतः एवं ऌकारोऽपि (सवर्णत्वात्)। एचः द्वादशानां संज्ञा। अनुनासिकाननुनासिकभेदेन यवला द्विधा। तेन अननुनासिकास्ते द्वयोर्द्वयोः संज्ञा।

**टिप्पणी -**

प्रत्ययः = विधीयमानः । न प्रत्ययः अप्रत्ययः ।

अप्रत्ययः = अविधीयमानः ।

अविधीयमानः = निर्देशरूपेण यः नोक्तः।

- केनचित् विधिना न प्रयुक्तः अण् वर्णः, तथा च उदित् वर्णः (कु, चु, टु, तु, पु - इति) सवर्णानाम् ग्रहणं करोति ।
- यदि कश्चन अण्-वर्णः कस्मिंश्चित् सूत्रे आदेशरूपेण (विधिरूपेण) उक्तः नास्ति, तर्हि सः अण्-वर्णः सवर्णानां ग्रहणं करोति इत्यर्थः ।

अत्रैव अण् परेण णकारेण। - अत्र सूत्रे उक्तः अण् इति प्रत्याहारः लण् इति सूत्रस्थेन णकारेण कृतः। अस्मिन् सूत्रे एव अण् इति प्रत्याहारेण चतुर्दशवर्णानां ग्रहणं भवति। तथा अण् इत्यनेन अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह्, य्, व्, र्, ल् एते वर्णाः ग्राह्याः।

तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रेण ऋकारस्य ऌकारस्य च मिथः सावर्ण्यं न प्राप्यते। अत्र तु एतयोः वर्णयोः सावर्ण्यं शास्त्रप्रवृत्तौ आवश्यकमेव। अतः आचार्येण कात्यायनेन एतयोः वर्णयोः सावर्ण्यं अनेन वार्त्तिकेन विहितम्।

वार्त्तिकम् - **ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्।**

संहितासंज्ञा विधायकं सूत्रम् -

**संहितासंज्ञा**

*सूत्रम्* – **परः सन्निकर्षः संहिता । १-४-१०४**

वृत्तिः – वर्णानाम् अतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।
त्रिपदं सूत्रमिदम् । अनेन सूत्रेण संहिता संज्ञा विधीयते ।

संयोगसंज्ञाविधायकं सूत्रम् -

**संयोगसंज्ञा**

*सूत्रम्* – **हलोऽनन्तराः संयोगः १-१-७**

वृत्तिः – अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युः ।

हलः अनन्तराः संयोगः इति पदच्छेदः । अनेन सूत्रेण संयोगसंज्ञा विधीयते ।

**टिप्पणी -**

- द्वयोः वर्णयोः उच्चारणम् अतिशयसान्निध्येन क्रियते चेत् तयोः वर्णयोः मध्ये विद्यमानस्य सान्निध्यस्य निर्देशः संहिता इति संज्ञया क्रियते – इति अस्य सूत्रस्य आशयः ।
- यथा वर्णानाम् अतिशयेन सान्निध्ये संहिता भवति तथा पदयोः मध्ये सन्धिः भवेत् । सत्याम् एव संहितायां सन्धिकार्याणि प्रवर्तन्ते ।
- संयोगः – वृक्षः – व् ऋ क् ष् अः इत्यस्मिन् पदे ककार षकारयोः मध्ये अचः व्यवधानं नास्ति । अतः तत्र संयोगः । मत्स्यः इत्यस्मिन् पदे त् स् य् इत्येते वर्णाः अज्व्यवधानं विना संयोज्यन्ते । अतः अत्र संयोगः द्वयोः द्वयोः संज्ञा ।

पदसंज्ञाविधायकं सूत्रम्

**पदसंज्ञा**

*सूत्रम्* – **सुप्तिङन्तं पदम् १-४-१४**

वृत्तिः - सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।
सुप्तिङन्तं पदम् इति द्विपदं सूत्रम् । अनेन सूत्रेण पदसंज्ञा विधीयते ।

**टिप्पणी -** सुप्तिङन्तम् इति विग्रहः । सुप् इत्यनेन सु औ जस् इत्यादयः एकविंशति विभक्तिप्रत्ययाः बोध्याः । एवं तिङ् इत्यनेन तिप् तस् झि इत्येवमादयः अष्टादशप्रत्ययाः गृह्यन्ते । सुप् प्रत्ययाः नामरूपाणां निष्पादने, तिङ् प्रत्ययाः क्रियापदानां निष्पादने च विहिताः भवन्ति ।

| प्रातिपदिकम् + सुप् (सुबन्तम्) = नामपदानि । यथा → वृक्षः, लता, फलम् |
|---|

धातु + तिङ् (तिङन्तम्) = क्रियापदानि । यथा → पठति वदति स्मरति ।

| सुप् प्रत्ययाः - २१ | | |
|---|---|---|
| सु | औ | जस् |
| अम् | औट् | शस् |
| टा | भ्याम् | भिस् |
| ङे | भ्याम् | भ्यस् |
| ङसि | भ्याम् | भ्यस् |
| ङस् | ओस् | आम् |
| ङि | ओस् | सुप् |

| तिङ् प्रत्ययाः - १८ | | |
|---|---|---|
| तिप् | तस् | झि |
| सिप् | थस् | थ |
| मिप् | वस् | मस् |
| त | आताम् | झ |
| थास् | आथाम् | ध्वम् |
| इट् | वहि | महिङ् |

## पठनप्रवर्तनानि

- **ह्रस्वदीर्घादिभेदानुसारं स्वराणाम् अनुसूचीं (पट्टिकां) रचयतु।**

  श्रद्धेया अंशाः –
  - स्वराक्षराणां चयनम् ।
  - ह्रस्व-दीर्घ-प्लुतादीनाम् अवगमनम् ।
  - पट्टिकायां विविच्य निवेशनम्।

- **माहेश्वरसूत्राणामाधारेण प्रत्याहारान् सूचयित्वा तेष्वन्तर्गतानि अक्षराणि चित्वा लिखतु।**

  श्रद्धेया अंशाः -
  - अनुबन्धे प्रदत्तानाम् अंशानां पठनम्।
  - प्रत्याहारानुसारं वर्णानां निवेशनम्
  - माहेश्वरसूत्राणां कण्ठस्थीकरणम्।

- **उच्चारणस्थानानुसारं वर्णानां पट्टिकां रचयतु।**

  श्रद्धेया अंशाः -
  - कण्ठताल्वादीनां स्थानानाम् अवगमनम्।
  - वर्णानां स्थानविवेचनम्।
  - पट्टिकायां निवेशनम्।

- **हलन्त्यम् इति सूत्रमधिकृत्य संगोष्ठीम् आयोजयतु।**

  श्रद्धेया अंशाः -
  - सूत्रस्य वृत्तिः पठनीया।
  - वृत्त्यन्तर्गतानां पदानां चयनम्।
  - कक्ष्यायाम् अवतारणम्।
  - टिप्पणीलेखनम्।

- **र इति वर्णः कथं प्रत्याहारः भवति इति सप्रमाणम् उपपाद्य प्रत्याहारान्तर्गतान् वर्णान् चित्वा लिखतु।**

  श्रद्धेया अंशाः -
  - हकारादिषु अकारः उच्चारणार्थः इत्यादिवाक्यानां पठनम्।
  - लण् सूत्रस्थस्य अकारस्य इत्संज्ञा इति ज्ञानम्।
  - प्रत्याहारान्तर्गतयोः वर्णयोः लेखनम्।

**संज्ञासूत्राणां प्रयोजनं किम्? इति विषये संवादं प्रचालयतु।**

## अभ्यासप्रश्नाः

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१. सूत्रकारः कः ?

( कात्यायनः, पाणिनिः, पतञ्जलिः)

२. भट्टोजिदीक्षितेन रचितः ग्रन्थः कः?

(वैयाकरणसिद्धान्तकौमुदी, प्रक्रियासर्वस्वम्, लघुसिद्धान्तकौमुदी)

३. माहेश्वरसूत्रेषु पाणिनिना कति अक्षराणि समाकलितानि ?

(32, 42, 14.)

४. लोपसंज्ञा विधायकं सूत्रं किम् ? ( हलन्त्यम्, अदर्शनं लोपः, उच्चैरुदात्तः)

५. इत्संज्ञा केन सूत्रेण विधीयते ? (समाहारः स्वरितः, उच्चैरुदात्तः, हलन्त्यम्)

६. नीचैः -------- ( अनुदात्तः, स्वरितः, उदात्तः)

७. अधो निर्दिष्टेषु सूत्रेषु उदात्तसंज्ञाविधायकं सूत्रं लिखत।
(नीचैरनुदात्तः, उच्चैरुदात्तः, हत्तन्त्यम्)

८. ------------ स्वरितः । (लोपः, उपदेशे, समाहारः)

९. अज्भिः अव्यवहितः हलः ------------- संज्ञाः स्युः ।

(उदात्तः, अनुदात्तः, संयोगः)

१०. संस्कृते .................. विभक्तयः सन्ति।

(अष्ट, सप्त, नव)

११. संस्कृतभाषायां ...................... वचनानि सन्ति।

(त्रीणि, चत्वारि, पञ्च)

१२. संस्कृते कति लिङ्गानि सन्ति?

(पञ्च, त्रीणि, अष्ट)

१३. संस्कृतभाषायां कति पुरुषाः सन्ति?

(त्रीणि, षट्, पञ्च)

**पूरयत –**

१४. ऊकाल: अच् ------- -------- प्लुतः ।

१५. अकुहविसर्जनीयानां --------- ।

१६. सूत्रार्थं लिखत - "मुखनासिकावचनोऽनुनासिकः ।

**उत्तरं लिखत -**

१७. सुप्तिङन्तं पदम् इति सूत्रं सूचनानुसारं सोदाहरणं व्याख्यात। सूचना - पदसंज्ञं स्यात् । रामः पठति।

१८. माहेश्वरसूत्राणि यथाक्रमं लिखत ।

१९. भाष्यलक्षणं लिखत ।

**यथोचितं योजयत –**

| २० | **क** | **ख** |
|---|---|---|
| | अष्टाध्यायी | भट्टोजिदीक्षितः |
| | लघुसिद्धान्तकौमुदी | पतञ्जलिः |
| | वार्त्तिकम् | वरदराजः |
| | वैयाकरणसिद्धान्तकौमुदी | पाणिनिः |
| | महाभाष्यम् | कात्यायनः |

| २१ | **क** | **ख** |
|---|---|---|
| | अकुहविसर्जनीयानां | तालु |
| | इचुयशानां | दन्ताः |
| | ऋटुरषाणां | ओष्ठौ |
| | लृतुलसानां | कण्ठः |
| | उपूपध्मानीयानाम् | मुर्धा |

# एककम् २

# व्याकरणप्रक्रिया

**आमुखम्**

प्रथमे एकके संस्कृतभाषायाः तथा व्याकरणस्य च घटना विशेषता च प्रतिपादिता। व्याकरणाचार्याणां परिचायनमपि तत्रैव प्रतिपादितम्। अत्र तु लघुसिद्धान्तकौमुदीम् आधारीकृत्य सन्धिकार्याणि प्रस्तूयन्ते। अस्मिन्नेकके त्रयः पाठाः सन्ति। तृतीयपाठः अच् सन्धयः चतुर्थपाठः हल्सन्धयः पञ्चमपाठः विसर्गसन्धयश्च। एते सन्धयः प्रमाणैः लौकिकोदाहरणैश्च प्रतिपाद्यन्ते।




## पाठः - ३

# अच्सन्धिः

**पाठप्रवेशः**

शब्दप्रपञ्चे वाक्यस्य प्राधान्यमस्ति। पदानां समूहः एव वाक्यम्। वर्णानां समूहः पदम्। व्याकरणे वर्णनिमित्तानि पदनिमित्तानि च कार्याणि सन्ति। तेषु सन्धिकार्याणि वर्णनिमित्तकानि भवन्ति। सन्धिम् अन्तरा वाक्यस्य चारुता अस्ति वा ? चर्चां कुरु।

**आमुखम्**

प्रायेण पूर्वपदस्य अन्त्येन वर्णेन सह उत्तरपदस्य आदिमवर्णः योजयति। स्वराणां परस्परसंयोगे के के वर्णविकाराः भवन्ति इति अच् सन्धिः इत्यनेन प्रतिपाद्यन्ते ।

"अस्त्युत्तरस्यां दिशि देवतात्मा"- इत्यारभ्यते कुमारसम्भवकाव्यम्। अत्र सन्देहः। अस्त्युत्तरस्याम् इत्यस्य पदच्छेदः कः ?- अस्ति उत्तरस्याम् इति पदच्छेदः। अत्र प्रमाणसूत्रं किम् ? "इकोयणचि" इति ।

## यण् सन्धिः

*सूत्रम्* - **इकोयणचि ६-७-७७**

*वृत्तिः* इकः स्थाने यण् स्यादचि संहितायां विषये।

| | |
|---|---|
| **इक्** | इ उ ऋ ऌ |
| **यण्** | य् व् र् ल् |

उदा- इ → य् - सुधी + उपास्यः = सुध्युपास्यः।

उ → व् - मधु + अरिः = मध्वरिः।

ऋ → र् - धातृ + अंशः = धात्रंशः।

ऌ → ल् - ऌ + आकृतिः = लाकृतिः।

***टिप्पणी*** - इकः यण् अचि इति पदच्छेदः । इक् इत्यनेन इ उ ऋ ऌ वर्णानां ग्रहणम् । इकः इति षष्ठीविभक्तिः । इ उ ऋ ऌ वर्णानां स्थाने इत्यर्थः । यण् इत्यनेन य व र ल वर्णानां ग्रहणम् । अचि इति सप्तमी विभक्तिः । अच् इत्यनेन सर्वे स्वरवर्णाः गृह्यन्ते । स्वरवर्णे परे इत्यर्थः ।

इकारस्य स्थाने यण् इत्युक्ते यवरलवर्णानां ग्रहणं भवति। तेषु वर्णेषु यः वर्णः तत्र भवति इति परिभाषासूत्रेण निर्दिशति।

*सूत्रम्* - **स्थानेऽन्तरतमः १-१-५०**

*वृत्तिः* - प्रसङ्गे सति सदृशतमः आदेशः स्यात्।

**टिप्पणी** - स्थाने अन्तरतमः इति पदच्छेदः । अयमेषाम् अतिशयेन अन्तरः अन्तरतमः सदृशतमः इत्यर्थः। आन्तर्यं चतुर्विधम्। स्थानकृतम्, अर्थकृतम्, प्रमाणकृतम्, गुणकृतं चेति। अत्र स्थानकृतमान्तर्यमेव।

*सूत्रम्*- **अनचि च ८-४-४७**

*वृत्तिः* - अचः परस्य यरः द्वे वा स्तः न त्वचि ।सुधी उपास्यः - सु ध् य् उपास्यः सु ध् ध् य् उपास्यः ।

**टिप्पणी** - अचो रहाभ्यां द्वे इति सूत्रात् यरः वा अचः द्वे एतानि पदानि अनुवर्तन्ते । अत्र धकारस्य द्वित्वम् ।

*सूत्रम्* - **झलां जश् झशि ८-४-५३**

*वृत्तिः*-झलां स्थाने जश् स्यात् झशि परे ।

सु ध् ध् य् उपास्यः इत्यत्र प्रथमधकारस्य दकारः सु द् ध् य् उपास्य इति ।

*उदा* - सुधी उपास्यः

सु ध् य् उपास्यः - इको यणचि ।

सु ध् ध् य् उपास्यः - अनचि च ।

सु द् ध् य् उपास्यः - झलां जश् झशि ।

सुद्ध्युपास्यः इति रूपम् । सुधीभिः उपास्यः इत्यर्थः । अनचि च इति विकल्पत्वात् धकारस्य द्वित्वाभावे सुध्युपास्यः इत्यपि रूपम् ।

वागर्थाविव संपृक्तौ इति श्लोके वागर्थाविव इति पदस्य सन्धिच्छेदः कथम् ? वागर्थौ इव इति । अत्र औकारस्य आवादेशः । केन सूत्रेण ? पश्यतु ।

## अयादिसन्धिः

*सूत्रम्* - **एचोऽयवायावः ६-१-७८**

*वृत्तिः* एचः क्रमाद् अय् अव्, आय, आव् एते स्युरचि ।

***टिप्पणी -*** एचः अयवायावः इति पदच्छेदः । इको यणचि इति सूत्रात् अचि इत्यनुवर्तते ।

| **एचः** | **ए** | **ओ** | **ऐ** | **औ** |
|---|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ | ↓ |
| **अयवायावः** | **अय्** | **अव्** | **आय्** | **आव्** |

उदा -

| | | | |
|---|---|---|---|
| (ए -अय्) | हरे+ए | (हर् अय् ए) | हरये |
| (ओ-अव्) | विष्णो+ए | (विष्ण् अव् ए) | विष्णवे |
| (ऐ -आय्) | नै +अकः | (न् आय् अकः) | नायकः |
| (औ -आव्) | पौ +अकः | (प् आव् अकः) | पावकः |

केषां गुणसंज्ञा ? इति प्रश्नस्य उत्तरं भवति इदं सूत्रम् ।

## गुणसंज्ञा

*सूत्रम्* - **अदेङ्गुणः १-१ -२**

*वृत्तिः* अत् एङ् च गुणसंज्ञः स्यात् ।

**टिप्पणी -** अत् एङ् गुणः इति पदच्छेदः । अत् इत्यनेन ह्रस्वस्य अकारस्य ग्रहणम् । अ ए ओ एते गुणवर्णाः । सन्धिकार्ये अ+इ=ए, अ+उ=ओ गुणः । अकार, एकारवर्णाः गुण इति नाम्ना

पठ्यन्ते ।

केरलराज्यस्य प्रधान देशीयोत्सवः कः ? इति प्रश्नस्य उत्तरं भवति श्रावणमहोत्सवः इति । महोत्सवः इत्यस्य सन्धिच्छेदः कः? अत्र प्रश्नस्य समाधानं भवति इदं सूत्रम् ।

*सूत्रम्* - **आद्गुणः ६-१-८७**

*वृत्तिः* अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् ।

**उदा -** (अ + इ = ए) उप+ इन्द्रः = उपेन्द्रः

(अ + इ = ए) गज+ इन्द्रः = गजेन्द्रः

(अ+ उ = ओ) गङ्गा+ उदकम्= गङ्गोदकम्

एवं सूर्योदयः, देवेन्द्रः इत्यादि ।

***टिप्पणी -*** आत् गुणः इति पदच्छेदः । इको यणचि इति सूत्रात् अचि इति पदम्, एकः पूर्वपरयोः इति सूत्रं च अनुवर्तते । अ शब्दस्य पञ्चम्येकवचनम् आत् इति । अवर्णादित्यर्थः । एवम् अवर्णादचि परे पूर्वपरयोः एकः गुणः आदेशः स्यादिति सूत्रार्थः ।

ब्रह्म+ऋषिः इति स्थिते अत्र ब्रह्म इति पदस्य अकारात् परः ऋकारः अस्ति इत्यतः गुण एकादेशः स्यात् । अत्र ऋकारस्य कः विकारः भवति इति पश्यामः-

## रपरत्वम्

*सूत्रम्* **- उरण् रपरः १-१-५१**

*वृत्तिः* ऋकारस्य स्थाने योऽण् सः रपरः सन्नेव प्रवर्त्तते ।

ऋ ⟶ अर् (रपरः)

ऌ ⟶ अल् (लपरः)

अकारऋकारयोर्गुणे अकाररेफे अर् । सप्त+ऋषयः - सप्तर्षयः ।

*उदा -* कृष्ण + ऋद्धिः - कृष्णर्द्धिः (कृष्ण अर् द्धिः)

तव + ऌकारः - तवल्कारः (तव अल् कारः)

**टिप्पणी -** उः अण् रपरः इति पदच्छेदः । उः इति ऋकारस्य षष्ठी एकवचनम् । रः परः यस्मात् स रपरः । र इति प्रत्याहारेण रलयोर्ग्रहणम् । एवम् ऋकारस्य स्थाने अण् रपरः ऌकारस्य स्थाने लपरश्च भवति ।

पाणिनिविरचितः ग्रन्थः भवति अष्टाध्यायी। अष्टौ अध्यायाः इत्यस्मात् अष्टाध्यायी इति पदम्। अष्टाध्यायी इति ग्रन्थः द्विधा परिकल्पितः

सपादसप्ताध्यायी (7¼) सप्त अध्यायाः एकः पादश्च ।

त्रिपादी (¾) त्रयः पादाः । एतद्भागद्वयं परस्परम् असिद्धं भवति।

एतद् अधोनिर्दिष्टे सूत्रे परामृष्टम्।

सूत्रम् **पूर्वत्रासिद्धम् ८-२-१**

वृत्तिः सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।

**टिप्पणी -** पूर्वत्र असिद्धम् इति पदच्छेदः । पूर्वत्र इति सप्तम्यर्थे त्रल् । न सिद्धम् असिद्धम्। अष्टाध्यायी ग्रन्थस्य अष्टमाध्यायस्य द्वितीयपादे प्रथमं सूत्रमिदम् । इतः परं त्रयः पादाः सन्ति । अतः परस्य त्रिपादी इति संज्ञा । तेन पूर्वशब्देन सप्ताध्यायाः अष्टमाध्यायस्य प्रथमपादश्च ग्राह्याः। तथा च सपादसप्ताध्यायीति लभ्यते।

वृद्धिः नाम किम्? इति प्रश्नस्य उत्तरं भवति इदं सूत्रम्

## वृद्धिसंज्ञा

*सूत्रम्-* **वृद्धिरादैच् १-१-१**

*वृत्तिः* आत् ऐच्च वृद्धिसंज्ञः स्यात्।

**टिप्पणी -** वृद्धिः आत् ऐच् इति पदच्छेदः। सन्धिकार्य्ये आ ऐ, औ एते वर्णाः वृद्धिसंज्ञकाः भवन्ति इत्यर्थः। सूत्रमिदं पाणिनीयस्य प्रथमं सूत्रम्।

अ, आ+ए - ऐ

अ, अ+ओ - औ

अ, अ+ऐ - ऐ

अ, अ+औ - औ

अथैकदा अत्र सन्धिच्छेदः कः?

अथ + एकदा इति । अत्र प्रमाणसूत्रं भवति वृद्धिरेचि ।

*सूत्रम् -* **वृद्धिरेचि ६-१-८८**

*वृत्तिः -* आदेचि परे वृद्धिः एकादेशः स्यात्।

उदा -

कृष्ण + एकत्वम्  -  कृष्णैकत्वम् (अ+ ए- ऐ)

देव + ऐश्वर्यम्  -  देवैश्वर्यम् (अ+ ऐ- ऐ)

गङ्गा + ओघः  -  गङ्गौघः (अ +ओ- औ)

कृष्ण + औत्कण्ठ्यम्  -कृष्णौत्कण्ठ्यम् ( अ+ औ -औ)

***टिप्पणी -*** वृद्धिः+ एचि इति पदच्छेदः । आद्गुणः इति सूत्रात् आत् इति एकः पूर्वपरयोः इति सूत्रं च अनुवर्त्तते । सूत्रमिदम् आद्गुणः इत्यस्य अपवादः भवति । गुणस्य अपवादत्वात् आद्गुणः इति सूत्रं नैवप्रवर्त्तते ।

त्वं कुत्र गच्छति । अत्र क्रियापदं भवति गच्छति । त्वं कुतः आगच्छति । अत्र क्रियापदं भवति आगच्छति । गच्छति इति क्रियापदेन साकम् आङ् इति उपसर्गयोजनेन आगच्छति इति सिद्धम् । उपसर्गाः के? इति प्रश्नस्य उत्तरं भवति इदं सूत्रम्-

## उपसर्गसंज्ञा

*सूत्रम्* - **उपसर्गाः क्रियायोगे १-४-५९**

*वृत्तिः* प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः ।

**प्रादयः-** प्र परा, अप्, सम्, अनु , अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप, एते प्रादयः ।

उदा - हृञ् हरणे - उपहरति, विहरति, संहरति । डु क्रीञ् द्रव्य विनिमये - परिक्रीणाति, विक्रीणाति ।

***टिप्पणी*** - उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ।।

रमेशः पठति अत्र क्रियापदं भवति पठति इति । पठति इत्यस्य धातुः किम् ? इत्याशङ्कायां इदं सूत्रं भवति ।

## धातुसंज्ञा

*सूत्रम्* - **भूवादयो धातवः १-३-१**

*वृत्तिः* - क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

(भूश्च वाश्च भूवौ, भूवौ आदी येषां ते भूवादयः । भूप्रभृतयो वासदृशाश्च ये ते धातुसंज्ञकाः इत्यर्थः)

**उदाहरणम्** भू भवति ।

लिख् लिखति ।

गम्ॢ गच्छति ।

ऋ अर् गुणः । ऋ आर् वृद्धिः । ऋ इति वर्णस्य वृद्धिविधायकं सूत्रम्-

*सूत्रम्* -**उपसर्गादृतिधातौ ६-१-९१**

*वृत्तिः*- अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात् ।

| ऋ → आर् |
|---|

अकारऋकारयोः वृद्धौ आकाररेफे आर् इति । यथा उप+ऋच्छति - उपार्च्छति ।

**उदा -** प्र+ ऋच्छति = प्रार्च्छति (प्र आर् च्छति)

उप +ऋच्छति = उपार्च्छति (उप आर् च्छति)

***टिप्पणी -*** उपसर्गात्+ ऋति धातौ इति पदच्छेदः ।आद्गुणः इति सूत्रात् आत् इति, वृद्धिरेचि इति सूत्रात् वृद्धिरिति, एकः पूर्वपरयोः इति सूत्रं चानुवर्तते । ऋति इति सप्तम्यन्तस्य ऋकारादौ इत्यर्थः । तथा च ऋकारादौ धातौ इत्यर्थः ।

## पररूपम्

पररूपविधिसूत्रम् -

*सूत्रम्* - **एङि पररूपम् ६-१-९४**

*वृत्तिः* आदुपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः स्यात् ।

**उदा -** प्र + एजते = प्रेजते (प्र + ए - प्रे) अकारएकारयोः एकार एकादेशः

उप + ओषति = उपोषति (उप + ओ - उपो) अकारओकारयोः ओकार एकादेशः

*टिप्पणी -* आत्, उपसर्गात्, धातौ एतानि पदानि एकः पूर्वपरयोः इति सूत्रं च अनुवर्तन्ते । वृद्धेः अपवादः ।

## सवर्णदीर्घः

न चापि काव्यं नवमित्यवद्यम् । अत्र चापि इत्यस्य पदच्छेदः भवति च + अपि । अत्र प्रमाणसूत्रम् -

*सूत्रम्* - **अकः सवर्णे दीर्घः ६-१-१०**

*वृत्तिः* अकः सवर्णे अचि परे पूर्वपरयोः दीर्घः एकादेशः स्यात् ।

| अक् | अ | इ | उ | ऋ |
|---|---|---|---|---|
| | अ+अ - आ (दीर्घः)<br>आ+आ - आ (दीर्घः) | इ + इ - ई (दीर्घः)<br>ई+ई -ई (दीर्घः) | उ+ उ - ऊ (दीर्घः)<br>ऊ+ऊ -ऊ (दीर्घः) | ऋ +ऋ - ॠ (दीर्घः)<br>ॠ+ॠ – ॠ (दीर्घः) |

**उदा -** दैत्य + अरिः = दैत्यारिः (अ + अ - आ)

श्री + ईशः = श्रीशः (ई + ई - ई)

विष्णु + उदयः = विष्णूदयः (उ +उ -ऊ)

पितृ + ऋणाम् = पितॄणम् (ऋ + ऋ - ॠ)

***टिप्पणी*** - इको यणचि इति सूत्रात् अचि इति एकः पूर्वपरयोः इति सूत्रं चानुवर्त्तते। इदं सूत्रमपि गुणस्य अपवादः।

आधुनिकसंस्कृतकविषु अन्यतमोऽयं डा. पि. के. नारायणपिल्लमहानुभावः। अत्र अन्यतमोऽयम् इत्यस्य पदच्छेदः भवति अन्यतमो + अयम् । अत्र प्रमाण सूत्रं किमिति आशङ्कायाम् इदं सूत्रं भवति-

## पूर्वरूपम्

*सूत्रम्* - **एङः पदान्तादति ६-१-१०९**

*वृत्तिः* पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् ।

एङः+ पदान्तात् +अति इति पदच्छेदः।

**उदा -** हरे + अव - हरेऽव ( र् + ए + अव - रेऽव)

विष्णो + अव - विष्णोऽव (ण् + ओ + अव - णोऽव)

***टिप्पणी*** - एचोऽयवायावः इत्यस्यापवादः । ह्रस्वाकारे परे पूर्वरूपमेकादेशः स्यात्। एकार अकारयोः एकार एकादेशः । अकारस्य स्थाने (ऽ) अनेन चिह्नेन प्रश्लेषः क्रियते।

ईकारान्त, ऊकारान्त, एकारान्त द्विवचनानां प्रगृह्यसंज्ञा विधायकं सूत्रं भवति इदम्-

## प्रगृह्यसंज्ञा

*सूत्रम्* - **ईदूदेद्द्विवचनं प्रगृह्यम् १-१-११**

*वृत्तिः* ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्।

***टिप्पणी*** - ईकारान्तम् ऊकारान्तम् एकारान्तञ्च द्विवचनं प्रगृह्यसंज्ञकम्।

प्लुतस्य प्रगृह्यस्य च अचि परे नित्यत्वेन प्रकृतिभावं विधीयमानं सूत्रं भवति इदम्

*सूत्रम्* - **प्लुतप्रगृह्या अचि नित्यम् ६-१-२५**

*वृत्तिः* एते अचि प्रकृत्या स्युः ।

**उदा -** हरी + एतौ = हरी एतौ (ईकारान्तद्विवचनम्)

विष्णू + इमौ = विष्णू इमौ (ऊकारान्तद्विवचनम्)

गङ्गे + अमू = गङ्गे अमू (एकारान्तद्विवचनम्)

***टिप्पणी -*** प्लुतः प्रगृह्याश्च अचि परे प्रकृत्या स्युः इत्यर्थः ।

कक्ष्यायां दिलीपः दूरे तिष्ठन्तं रमेशम् आह्वयति । रमेश ३...... इति । अत्र दूरस्थे सम्बोधने वाक्यस्य प्लुतः (३) प्रयुज्यते । अत्र विशदीकरणं भवति इदं सूत्रम्-

*सूत्रम्* -**दूराद्धूते च ८-२-२४**

*वृत्तिः* दूरात् संबोधने वाक्यस्य टेः प्लुतः वा स्यात् ।

आगच्छ कृष्ण (३) अत्र गौश्चरति इत्यत्र कृष्ण शब्दस्य अन्तिमः अकारः (टि) दूरात् सम्बोधनवेलायां प्लुतो भवति । अतः नित्यं प्रकृतिभावः ।

***टिप्पणी -*** दूरात् + हूते च इति पदच्छेदः । अत्र प्लुतः विकल्पेन विधीयते ।अतो अत्र दीर्घो वा प्लुतो वा प्रयोक्तुं शक्यते । टि इति काचन संज्ञा । अचां मध्ये यो अन्त्यः स आदिः यस्य तत् टिसंज्ञं स्यात् । अचोऽन्त्यादि टि (१-१-६४) इति पाणीनीयं सूत्रम् ।

**पठनप्रवर्तनानि**

- **पूर्वत्रासिद्धम् इति सूत्रमधिकृत्य चर्चां प्रचालयतु।**

  श्रद्धेयाः अंशाः –
  - अष्टाध्याय्याः भागद्वयमधिकृत्य अवगमनम्।
  - चर्चासूचकानां चयनम्।
  - टिप्पणीलेखनम्।

- **वृद्धिःसवर्णदीर्घश्च कथं गुणस्यापवादौ भवतः?- इति विषये संवादमायोजयतु।**

  श्रद्धेयाः अंशाः –
  - वृद्धिरेचि, अकः सवर्णे दीर्घः, आद्गुणः इति सूत्रत्रयस्य सम्यक् पठनम्।
  - सूचकानां चयनम्।
  - वादानां सम्यक् प्रस्तुतीकरणम्।

- **प्रादयः क्रियापदैः योजयित्वा पट्टिकां रचयतु।**

  श्रद्धेयाः अंशाः –
  - प्रादीनाम् अवगमनम्।
  - क्रियापदैः सह योजने अर्थभेदनिरूपणम्।
  - क्रमशः पट्टिकायां निवेशनम्।

- **पाठेऽस्मिन् विकल्पविधिसूत्रे के?, वृत्तिसहितं लिखतु।**

  श्रद्धेयाः अंशाः –
  - विकल्पविधिः कः इति अवगमनम्।
  - विकल्पविधिसूत्रयोः वृत्तिलेखनम्।
  - समर्थनम्।

- **एकादेशः इत्यनेन किमुद्दिश्यते? पाठभागात् एकादेशविधिसूत्राणि चित्वा लिखतु।**

  श्रद्धेयाः अंशाः –
  - एकादेशः कः इत्यवगमनम्।
  - सूत्राणां व्याख्यानपठनम्।
  - पाठभागस्थानां तादृशसूत्राणां चयनम्।

**संहिता संयोगः इति द्वयोः संज्ञयोः भेदं विविच्य वदतु। अचां व्यवधानाभावे सन्धिः कथं प्रवर्तते?**




# पाठः - ४

## हल् सन्धिः

**पाठप्रवेशः**

अनन्ततल्पे <u>हरिश्शेते</u> - वाक्यमिदं पठतु। वाक्येऽस्मिन् रेखाङ्कितं पदं विश्लेषयतु। एतादृशं सन्धिकार्यम् अत्र पठामः।

आमुखम्

**हल्** इति व्यञ्जनानां संज्ञा। व्यञ्जनानां संहितायां वर्णविकारः कथं सम्भवति इति अत्र विशदयति।

मनश्शास्त्रम् इति पदं श्रुतं वा? । अत्र पदच्छेदः मनस्+ शास्त्रम् इति। कः वर्णविपर्ययः अत्र समभवत्? मनस् इति पदे अन्तिमस्य सकारस्य शकारादेशः समभवत्। तदेवम् –

### श्चुत्वसन्धिः

*सूत्रम्* – **स्तोः श्चुना श्चुः। - ८-४-४०**

*वृत्तिः* – सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

| | | | | | | |
|---|---|---|---|---|---|---|
| सकारः | त | थ | द | ध | न | एतेषां वर्णानाम् (स्थानी) |
| शकारः | च | छ | ज | झ | ञ | एभिः वर्णैः योगे (योगः) |
| शकारः | च | छ | ज | झ | ञ | एते वर्णाः स्युः। (आदेशः) |

**उदा -** (स - श) रामस् + शेते = रामश्शेते

(स - श) रामस् + चिनोति = रामश्चिनोति

(त - च) सत् + चित् = सच्चित्

(न - ञ) शार्ङ्गिन् + जय = शार्ङ्गिञ्जयः

सन्धिरयं श्चुत्वसन्धिरिति कथ्यते।

**टिप्पणी -** तुः इति तवर्गस्य सूचना। स् च तुः च अनयोः समाहारः स्तुः। तस्य- स्तोः, सकारतवर्गयोः इत्यर्थः। चुः इति चवर्गस्य सूचना। श् च चुश्च श्चुः। तेन श्चुना, शकारचवर्गाभ्याम् इत्यर्थः। योगे इत्यध्याहियते। स्तोः इति स्थानी। एषां स्थाने इत्यर्थः। श्चुः इति आदेशश्च। अतः स्थान्यादेशयोः यथासंख्यं भवेत्। अतः सकारस्य शकारः तवर्गस्य चवर्गश्च आदेशः स्यात्।

तत् + टीका – तट्टीका । अत्र कः वर्णविकारः? इति पश्यामः। अत्र तवर्गस्य टवर्गेण योगे तवर्गस्य स्थाने टवर्गः आदेशः भवति।

## ष्टुत्वसन्धिः

*सूत्रम्* - **ष्टुना ष्टुः ८-८-४१**

*वृत्तिः* – स्तोः ष्टुना योगे ष्टुः स्यात्। तथा हि सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः इति फलितोऽर्थः।

| | | | | | | |
|---|---|---|---|---|---|---|
| सकारः | त | थ | द | ध | न | एतेषां वर्णानाम् (स्थानी) |
| षकारः | ट | ठ | ड | ढ | ण | एभिः वर्णैः योगे (योगः) |
| षकारः | ट | ठ | ड | ढ | ण | एते वर्णाः स्युः। (आदेशः) |

उदा - (स – ष) रामस् + षष्टः - रामष्षष्टः

(स - ष) रामस् + टीकते - रामष्टीकते

(त – ट) पेष् + ता - पेष्टा

**टिप्पणी -** स्तोः इत्यनुवर्तते। सकारतवर्गयोः इत्यर्थः।

वाक् + अर्थः वागर्थः। अत्र कः वर्णविकारः भवति इति पश्यामः।

## जश्त्वसन्धिः

*सूत्रम्* – **झलां जशोऽन्ते ८-२-३९**

*वृत्तिः* पदान्ते झलां जशः स्युः।

उदा - (क - ग) वाक् + ईशः =वागीशः

**टिप्पणी -** झलां जशः अन्ते इति पदच्छेदः। झभञ् सूत्रस्थ झकारादारभ्य हल् सूत्रस्थ ल् इति इत् पर्यन्तं वर्णाः झल् प्रत्याहारे अन्तर्भवन्ति। तथा जबगडदश् इति सूत्रस्थवर्णाः जश् प्रत्याहारे अन्तर्भवन्ति।

भवत्+ मानसम् - भवन्मानसम्। अत्र वर्णानां कः आदेशः सम्भवति?

## अनुनासिकादेशः

*सूत्रम्* - **यरोऽनुनासिकेऽनुनासिको वा ८-४-४५**

*वृत्तिः* – यरः पदान्तस्य अनुनासिके परे अनुनासिको वा स्यात्।

**उदा** - एतद् + मुरारिः - एतन्मुरारिः। (दकारस्य तद्वर्गपञ्चमः नकारः आदेशः)

दिग् + मुखम् - दिङ्मुखम्। (गकारस्य तद्वर्गपञ्चमः ङकारः अदेशः)

षड् + मुखः - षण्मुखः। (डकारस्य टवर्गपञ्चमः णकारः आदेशः)

***टिप्पणी*** - यरः अनुनासिके अनुनासिकः वा इति पदच्छेदः। हकारं विहाय सर्वाणि व्यञ्जनानि यर् प्रत्याहारे अन्तर्भवन्ति। सूत्रमिदं विकल्पं भवति।

**प्रत्यये भाषायां नित्यम्** इति वार्त्तिकानुसारं प्रत्ययेन सह संयोगे उपर्युक्तः विकल्पः न भवति, नित्यमेव अनुनासिकादेशो भवति।

उदा - चित् + मयम् - चिन्मयम् (तकारस्य वर्गपञ्चमः नकारः आदेशः)

अप् + मयम् - अम्मयम्। (पकारस्य वर्गपञ्चमः मकारः आदेशः)

उभयत्रापि मयट् इति प्रत्ययः। अतः नित्यम् अनुनासिकादेशः।

परसवर्णादेशः कः? इति चिन्तयामः। कश्चिल्लेखः इत्यस्य पदच्छेदः कश्चित्+लेखः इति। अत्र तवर्गात् परः लकारः अस्ति इत्यतः तकारस्यापि लकारादेशः। तदेवम्

## परसवर्णादेशः

*सूत्रम्* - **तोर्लि: ८-४-६०**

वृत्तिः - तवर्गस्य लकारे परे परसवर्णः स्यात्।

उदा - तद् + लयः = तल्लयः (तवर्गस्य दकारस्य लकारे परे लकारादेशः।)

मरुत्+लोलितः = मरुल्लोलितः (तकारस्य लकारे परे लकारादेशः।)

विद्वान्+लिखति = विद्वांल्लिखति (नकारस्य लकारे परे अनुनासिकलकारादेशः।)

**टिप्पणी** - तुः इत्यस्य षष्ठी एकवचनं भवति तोः इति। तुः इत्यनेन तवर्गः उक्तः। एवं तवर्गस्य लकारे परे परस्य लकारस्य सवर्णः आदेशः स्यात् इति सूत्रार्थः।

*सूत्रम्*– **खरि च। ८-४-५५**

*वृत्तिः* - खरि परे झलां चरः स्युः।

***टिप्पणी -*** खर् प्रत्याहारेण खफछठथचटतकपशषस वर्णानां ग्रहणम्। झल् प्रत्याहारेण झभञ् सूत्रादारभ्य हल् सूत्रपर्यन्तं वर्णाः ग्राह्याः। चर् प्रत्याहारेण चटतशषस वर्णाः ग्राह्याः।

*सूत्रम्*–**शश्छोऽटि ८-४-६३**

*वृत्तिः*– झयः परस्य शस्य छो वाऽटि

उदा- तद् शिवः श्चुत्वं-स्तोःश्चुना श्चुः, तज् शिवः चर्त्वं – खरि च, तच् शिवः, अनेन छत्वे तच्छिवः।

***टिप्पणी -*** झभञ् सूत्रस्थात् झकारादारभ्य कपय् सूत्रस्थ य् इति इतः पूर्वपकारपर्यन्तं वर्णाः झय् प्रत्याहारे अन्तर्भवन्ति। तस्मात् परस्य शकारस्य विकल्पेन छकारादेशः। शः छः अटि इति पदच्छेदः। झयोहोऽन्यतरस्याम् इति सूत्रात् झयः इति अन्यतरस्याम् इति च अनुवर्तते।

ईश्वरम् इत्यत्र ईश्वरपदस्य अन्ते मकारो वा अनुस्वारो वा युक्तः इति सन्देहस्य समाधानं भवति

*सूत्रम्* – **मोऽनुस्वारः ८-३-२३**

*वृत्तिः* – मान्तस्य पदस्य अनुस्वारः स्यात् हलि।

उदा – हरिम् + वन्दे - हरिं वन्दे। अत्र मकारस्य हलि परे अनुस्वारः।

एवं नकारान्तपदस्य मकारान्तपदस्य च अनुस्वारविधायकं सूत्रम् पठति-

**सूत्रम् – नश्चापदान्तस्य झलि। ८-३-२४**

वृत्तिः – नस्य मस्य च अपदान्तस्य झलि अनुस्वारः।

**उदा** - यशान् + सि - यशांसि नस्य अनुस्वारः झल् प्रत्याहारान्तर्गते सकारे परे।

आक्रम् + स्यते - आक्रंस्यते। मकारस्य अनुस्वारः झल्यन्तर्गते सकारे परे।

शाम् + तः इति स्थिते अनेन सूत्रेण मकारस्य अनुस्वारे शांतः इति सिद्धे -

*सूत्रम्* – **अनुस्वारस्य ययि परसवर्णः ८-४-५८**

वृत्तिः – अनुस्वारस्य ययि परे परसवर्णः स्यात्।

उदा – शां तः अनेन सूत्रेण परसवर्णः अनुस्वारस्य तवर्गपञ्चमः नकारः आदेशः स्यात् – शान्तः इति रूपम्।

***टिप्पणी*** – वा पदान्तस्य इति सूत्रेणापि परसवर्णः विकल्पेन विधीयते। त्वम् + करोषि- त्वं

करोषि, त्वङ्करोषि इत्यादिरूपं सिध्यति। त्वम् करोषि इति स्थिते मोऽनुस्वारः इति मकारस्य अनुस्वारः- त्वं करोषि इति रूपम्। वा पदान्तस्य इति सूत्रेण विकल्पेन परसवर्णे त्वङ्करोषि इति रूपम्।

एतावद् आदेशः परामृष्टः। इतः परम् आगमः परामृश्यते। -

## तुगागमः

*सूत्रम्* – **शि तुक्** ८-३-३१

*वृत्तिः* – पदान्तस्य नस्य शे परे तुग्वा स्यात्।

उदा - सन् + शम्भुः – सन् त् शम्भुः, श्चुत्वं – सन् च् शम्भुः,परसवर्णः सञ् च् शम्भुः छत्वं सञ्च्छम्भुः तुगभावे सञ्शम्भुः।

टिप्पणी - तुक् इति आगमे ककारः उकारश्च इतौ भवतः। हलन्त्यम् इत्यनेन ककारस्य, उपदेशेऽजनुनासिका इत् इत्यनेन उकारस्य च इत्संज्ञायां तस्य लोपः इति सूत्रेण लोपः

तस्मिन्नवसरे स वदन्नस्ति। अत्र तस्मिन्नवसरे, वदन्नस्ति इति पदयोः सन्धिच्छेदः कथम्-उच्यते-

## ङमुडागमः

*सूत्रम्* – **ङमो ह्रस्वादचि ङमुण्नित्यम्** ८-३-३२

*वृत्तिः* – ह्रस्वात् परो यो ङम्, तदन्तं यत्पदं तस्मात्परस्य अचो नित्यं ङमुडागमः स्यात्।

| | | | | |
|---|---|---|---|---|
| **उदा -** ङमुडागमः - | (ङ्+ङ्+आ) | प्रत्यङ् + आत्मा | - | प्रत्यङ्ङात्मा |
| ङमुडागमः - | (ण्+ण्+ई) | सुगण् + ईशः | - | सुगुण्णीशः। |
| ङमुडागमः - | (न्+न्+अ) | सन् + अच्युतः | - | सन्नच्युतः। |

***टिप्पणी -*** ङम् इति प्रत्याहारः। ङ ण न इति वर्णानां ग्रहणम्। ङमुट् इत्यनेन ङुट्,णुट्,नुट् इत्येते आगमाः ग्राह्याः। पूर्वोक्ते उदाहरणे (तस्मिन् अवसरे इति) नकारात् अचि परे नुट् आगमः तस्मिन् न् अवसरे –तस्मिन्नवसरे इति।

## पठनप्रवर्तनानि

- **आगमविधिसूत्राणि पाठभागात् चित्वा उदाहरणसहितं पट्टिकां करोतु।**

  श्रद्धेयौ अंशौ –
  - पाठभागः सम्यक् पठनीयः।
  - आगमः कः इति अवगन्तव्यम्।

- **पाठभागात् विकल्पविधिसूत्राणि चित्वा वृत्तिसहितं लिखतु।**

  श्रद्धेयाः अंशाः -
  - पाठभागः सम्यक् पठनीयः।
  - विकल्पः कः इति अवगमनम्।
  - वृत्तिसहितं लेखनसामर्थ्यम्

- **आदेशविधिसूत्राणि तथा आगमविधिसूत्राणि च विवच्य पट्टिकां करोतु।**

  श्रद्धेयाः अंशाः--
  - पाठभागस्य सम्यक् पठनम्।
  - आदेशः कः?, आगमः कः? इत्यवगमनम्।
  - भेदं विवच्य पट्टिकायां निवेशनम्।

**हलां संयोगे आगमादेशद्वित्त्वप्रभृतयः सन्धयः भवन्ति इति पठितं खलु, दैनन्दिनव्यवहारे एतेषां सन्धीनां प्रसक्तिमधिकृत्य सोदाहरणं टिप्पणीं लिखतु। विसर्गसहितानि पदानि विविच्य पृथक् लिखतु।**

पाठः - ५

# विसर्गसन्धिः

**पाठप्रवेशः**

'ज्यायसी चेत् **कर्मणस्ते** मता बुद्धिर्जनार्दन' – इति गीताश्लोकांशः श्रुतः खलु, अत्र अधोरेखाङ्कितस्य पदस्य विश्लेषः कथम् इति चिन्तयतु। अत्र कः सन्धिः इति पश्यामः।

**आमुखम्**

संहितायां विसर्गेण सह अचां हलां च कः वर्णविकारः सम्भवति? इति अत्र चिन्त्यते।

अशोकः पठति इत्यत्र ककारात् परः विसर्गः केन सूत्रेण विहितः इत्यस्य समाधानम्-

**रेफस्य विसर्गः**

*सूत्रम्* – **खरवसानयोर्विसर्जनीयः १५-३-८**

*वृत्तिः* – खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्।

रामस्तु इत्यस्य पदच्छेदः रामः + तु इति। अत्र सकारः कथमागतः इत्यस्य समाधानम् –

**विसर्गस्य सकारः**

*सूत्रम्*– **विसर्जनीयस्य सः ३४-३-८**

*वृत्तिः* – खरि विसर्जनीयस्य सः स्यात्।

उदा - विष्णुः + त्रातः - विष्णुस्त्रातः ( विसर्गस्य सकारः)

***टिप्पणी -*** खर् इति प्रत्याहारः ख फ छ ठ थ च ट त क प श ष स इत्येते वर्णाः ग्राह्याः। खरि परे विसर्गस्य सकारादेशः स्यात् इति सूत्रार्थः।

सकारस्य रुत्वविधायकं सूत्रम् -

**रुत्वसन्धिः**

*सूत्रम्* – **ससजुषो रुः ६६-२-८**

*वृत्तिः* पदान्तस्य सस्य सजुष् शब्दस्य च रुः स्यात्।

**टिप्पणी -** सश्च सजुष् च ससजुषौ तयोः ससजुषोः। पदान्तस्य इति पदम् अनुवर्तते।

उदा - शिवस् + अर्च्यः – अनेन रुत्वे शिवर् – अर्च्यः। (स् – र्) अत्र रोः उत्वविधायकं सूत्रम् –

**रोः उत्वम्**

*सूत्रम्* – **अतो रोरप्लुतादप्लुते ११३-१-६**

*वृत्तिः* - अप्लुतात् अतः परस्य रोः उः स्यात् अप्लुते अति।

उदा - शिवस् + अर्च्यः

शिवर् अर्च्यः - ससजुषो रुः।

शिव उ अर्च्यः - अतो रोरप्लुतादप्लुते।

शिवो अर्च्यः - आद्गुणः।

शिवोऽर्च्यः - एङः पदान्तादति।

**टिप्पणी -** अतः रोः अप्लुतात् अप्लुते इति पदच्छेदः। उः इति अति इति च अनुवर्तते। अत् इत्यनेन ह्रस्वः अकारः बोध्यः। अप्लुतात् ह्रस्वाकारात् परस्य रोः –(रेफस्य) उः स्यात् अप्लुते – ह्रस्वे अकारे परे इति सूत्रार्थः। दूरात् सम्बोधने ह्रस्वस्यापि प्लुतसंज्ञा स्यात्। तदा उः न भवति इति सूचयितुम् अप्लुतात् इति पदम्।

*हश् परे रोः उत्वविधिसूत्रं भवति इदम्*

**रोः उत्वम्**

*सूत्रम्* – **हशि च ११४-१-६**

*वृत्तिः* – अप्लुतादतः परस्य रोः उः स्यात् हशि।

उदा - शिवस् + वन्द्यः

शिवर् + वन्द्यः - ससजुषो रुः।

शिव उ वन्द्यः - हशि च।

शिवो वन्द्यः - आद्गुणः।

**टिप्पणी -** हयवरट् इत्यतः आरभ्य जबगडदश् इति सूत्रं यावत् हश् प्रत्याहारः। अतः रोः उः अप्लुतात् इत्येतानि पदानि अनुवर्तनीयीनि। पूर्वस्मिन् सूत्रे उक्तवत् रोः उः स्यादिति सूत्रार्थः। अति इत्यस्य स्थाने हशि इति बोद्धव्यम्। हशि परे रोः उः स्यात् इति सूत्रार्थः।

## रेफस्य याकारादेशविधिः

भो भगो अघो अपूर्वस्य रोः यकारादेशविधिः

*सूत्रम्* – **भोभगोऽघोऽपूर्वस्य योऽशि। १७-३-८**

*वृत्तिः* – भो भगो अघो अपूर्वस्य रोः यकारः आदेशः स्यात्। ( र – य)

## यकारलोप विधिः

यकारस्य लोपः विधीयते –

*सूत्रम्* – **हलि सर्वेषाम् २२-३-८**

*वृत्तिः* – भो भगो अघो अपूर्वस्य यस्य लोपः स्यात् हलि सर्वेषां मते।

उदा – (स्) भोस् + देवाः

(सस्य र्) भोर् देवाः - ससजुषो रुः

(रस्य य्) भोय् देवाः - भो भगोऽघोऽपूर्वस्य योऽशि

(यलोपः) भो देवाः - हलि सर्वेषाम्

एवं भगोस् नमस्ते - भगो नमस्ते, अघोस् याहि - अघो याहि इत्यादि रूपाणि।

**टिप्पणी -** भो भगोऽघोऽपूर्वस्य योऽशि इति सूत्रेण विहितःयकारादेशः अतो रोरप्लुतादप्लुते, हशि च इति सूत्रद्वयेन विहितम् उत्वं प्रति असिद्धम्। अत उत्वस्य अप्रवृत्तावेव इदं सूत्रं प्रवर्तते।

नीराजनं समर्पयामि इत्यत्र नीराजनम् इति पदस्य विश्लेषणं कथम्? – निर् राजनम् इति। निर् + राजनम् – नीराजनम् कथमित्यस्य समाधानं भवति इदं सूत्रद्वयम् –

## रेफलोपः

*सूत्रम्* – **रो रि ६९-२-८**

*वृत्तिः* – रेफस्य रेफे परे लोपः स्यात्।

**टिप्पणी -** रः इति षष्ठ्यन्तं, रि इति सप्तम्यन्तम् लोपः इति पदमनुवर्तते।

*सूत्रम्* – **ढ्रलोपे पूर्वस्य दीर्घोऽणः १११-३-६**

*वृत्तिः* – ढरेफयोः लोपनिमित्तयोः पूर्वस्य अणो दीर्घः स्यात्।

| | | | |
|---|---|---|---|
| उदा – (र्) | पुनर् + रमते | | |
| (रेफलोपः) | पुन - रमते | = | रो रि |
| (अकारदीर्घः) | पुनारमते | = | ढ्रलोपे पूर्वस्य दीर्घोऽणः |
| हरिस् + रम्यः | | | |
| (सस्य र्) | हरिर् - रम्यः | = | ससजुषो रुः |
| (रेफलोपः) | हरि रम्यः | = | रो रि |
| (इकारदीर्घः) | हरीरम्यः | = | ढ्रलोपे पूर्वस्य दीर्घोऽणः |

एवं शम्भुस् राजते - शम्भूराजते।

विधिद्वयस्य तुल्यरूपेण प्रवृत्तौ कस्य बलम् इति विशदयति –

*सूत्रम्* – **विप्रतिषेधे परं कार्यम् १-४-२**

*वृत्तिः* – तुल्यबलविरोधे परं कार्यं स्यात्।

मनस् रथः इति स्थिते सकारस्य रेफादेशः (ससजुषो रुः) मनर् रथः – इति जाते हशि च इति उत्वस्य रो रि इति रेफलोपस्य च युगपत् प्राप्तिः सम्भवति। अत्र परं शास्त्रं रो रि इति सूत्रमेव। किन्तु अत्र विप्रतिषेधे परं कार्यम् इति अधिकारसूत्रं प्रवर्तते-

रो रि इति सूत्रं त्रिपाद्यामन्तर्भवति इत्यतः हशि च इति सूत्रं प्रति असिद्धः। अतः मनर् रथः इत्यत्र हशि च इति उत्वमेव प्रवर्तते मन उ रथः इति। आद्गुण इति गुणे मनोरथः इति रूपम्।

***टिप्पणी*** - तुल्यबलविरोध एव विप्रतिषेधः। विप्रतिषेधे सति परेण शास्त्रेण विहितं कार्यं भवति इति सूत्रार्थः। अष्टाध्यायीसूत्रपाठमनुसृत्यैव अत्र पूर्वपरविवेकः। क्वचिच्चरितार्थयोः द्वयोः शास्त्रयोः एकस्मिन् लक्ष्ये समावेशः तुल्यबलविरोधः।

**पठनप्रवर्तनानि**

- **“विप्रतिषेधे परं कार्यम्” इति सूत्रं पठित्वा पूर्वपरविवेचनं कथमिति चर्चां कृत्वा टिप्पणिं लिखतु ।**

श्रद्धेयाः अंशाः-
- सूत्राणां क्रमसंख्याज्ञानम् ।
- पूर्वपरविवेचनम् ।
- सूचकानुसारं टिप्पणीलेखनम् ।

- **विसर्गनियममधिकृत्य चर्चां प्रचालयतु ।**

श्रद्धेयाः अंशाः-
- संघे उपविश्य चिन्तनम् ।
- चर्चायाः क्रोडीकरणम् ।
- टिप्पणीलेखनम् ।

- **रोः उत्वविधिकार्याण्यधिकृत्य चर्चां कृत्वा प्रयोगान् विशदयतु ।**

श्रद्धेयाः अंशाः-
- सूत्राणां सम्यगवगमनम् ।
- उदाहरणे योजनम् ।
- प्रयोगाणां विशदीकरणम् ।

- **रोः यकारादेशः, अनन्तरं यकारलोपः केन इत्यादीन् प्रश्नानधिकृत्य चर्चां करोतु ।**

श्रद्धेयाः अंशाः-
- सूत्राणां वृत्तिसहितं पठनम् ।
- उदाहरणानाम् अवगमनम् ।
- चर्चायां भागग्रहणम् ।

- **रेफलोपानन्तरं दीर्घः कथमिति सोदाहरणं कक्ष्यायाम् अवतारयतु ।**

श्रद्धेयौ अंशौ-
- वृत्तिसहितं सूत्राणां पठनम् ।
- टिप्पणीं लिखित्वा अवतारणम् ।

**“काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्” प्रस्तावनामिमामधिकृत्य चर्चां कुरुत।**

## अभ्यासप्रश्नाः

**१. कोष्ठकात् समुचितमुत्तरं चित्वा लिखतु ।**

1. सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् । सूत्रं किम्?
( रोरि, पूर्वत्रासिद्धम्, वृद्धिरेचि)

2. वृद्धिसंज्ञा विधिसूत्रं किम्?
( वृद्धिरादैच्, एङि पररूपम्, उपसर्गाः क्रियायोगे)

3. गुणसंज्ञा केन सूत्रेण विधीयते ।
(इकोयणचि, झलां जश् झशि, अदेङ् गुणः)

4. अकः सवर्णे ..................... ।
(ह्रस्वः, दीर्घः, प्लुतः)

5. ................ क्रियायोगे ।
(वृद्धिः, गुणः, उपसर्गाः)

6. तवर्गस्य लकारे परे परसवर्णः स्यात्- सूत्रं किम्?
(झलां जशोऽन्ते, तोर्लि, ष्टुना ष्टुः)

7. अधो निर्दिष्टेषु ष्टुत्वविधिसूत्रं किम्?
(ष्टुना ष्टुः, स्तोः श्चुना श्चुः, मोऽनुस्वारः)

8. श्चुत्वं केन सूत्रेण विधीयते?
(तोर्लिः, स्तोः श्चुना श्चुः, मोऽनुस्वारः)

9. यरोऽनुनासिके.......... वा ।
(श्चुत्वम्, ष्टुत्वम्, अनुनासिको)

10. ........... ययि परसवर्णः ।
( पदान्तस्य, अनुस्वारस्य, अन्त्यस्य)

**२. उदाहरणानुसारं सप्रमाणं सन्धत्त।**

| | | | |
|---|---|---|---|
| उदा - द्वेष्यो+अपि | - | द्वेष्योऽपि, | एङः पदान्तादति |
| 1. सुकृतो+अपि | - | ............. | ....................... |
| 2. राधवो+अपि | - | ............. | ....................... |
| 3. धूमो+अपि | - | ............. | ....................... |
| 4. धूमो+अस्तु | - | ............. | ....................... |
| उदा - दैत्य+अरिः | - | दैत्यारिः | अकः सवर्णेदीर्घः |
| 5. श्री+ईशः | - | .............. | ................ |
| 6. विष्णु+उदयः | - | .............. | ................ |
| 7. तथा+अर्हसि | - | .............. | ................ |
| 8. पठित्वा+अपि | - | .............. | ................ |
| 9. उक्त्वा+अपि | - | .............. | ................ |
| 10. कुत्र+अपि | - | .............. | ................ |
| 11. च+अपि | - | .............. | ................ |
| 12. गत्वा+अपि | - | .............. | ................ |
| उदा - कृष्ण+एकत्वम् | - | कृष्णैकत्वम् | वृद्धिरेचि |
| 13. सर्वदा + एव | - | ......... | .............. |
| 14. तदा + एव | - | ......... | .............. |
| 15. एक + एकं | - | ......... | .............. |
| 16. तस्य + एव | - | ......... | .............. |

**३. उदाहरणानुसारं पदानि सन्धत्त।**

| | | | |
|---|---|---|---|
| उदा - वाक्+अभाषत | - | वागभाषत, | झलांजशोऽन्ते। |
| 1. वाक्+ईशः | - | ..................... | ..................... |
| 2. वाक्+अर्थः | - | ..................... | ..................... |
| 3. वाक्+विलासः | - | ..................... | ..................... |
| 4. वाक्+विभवः | - | ..................... | ..................... |

**४. उदाहरणानुसारं सप्रमाणं सन्धिच्छेदं कुरुत।**

**उदा -** इत्युक्त्वा - इति+उक्त्वा, इकोयणचि

1. इत्युवाच - ............. ......................

2. इत्यवोचन् - ............. ......................

3. इत्येव - ............. ......................

4. इत्यब्रवीत् - ............. ......................

५. सप्रमाणं सन्धिविच्छेदं कुरुत।

उपेन्द्रः - उप+इन्द्रः आद्गुणः

1. गजेन्द्रः - ......... ..............

2. तदेव - ......... ..............

3. ममेति - ......... ..............

4. तथेव - ......... ..............

5. ईश्वरेच्छा - ......... ..............

**६. उदाहरणानुसारं पदानां सन्धिच्छेदं कुरुत।**

उदा - रामश्शेते - रामस्+शेते स्तोः श्चुना श्चुः।.

1. रामष्टीकते - ..................... .....................

2. षण्मुखः - ..................... .....................

3. तल्लयः - ..................... .....................

4. हरिं वन्दे - ..................... .....................

**७. यथोचितं योजयत।**

| **क** | | **ख** |
|---|---|---|
| उपेन्द्रः | - | हरे + अव |
| कृष्णैकत्वम् | - | प्र+एजते |
| प्रेजते | - | कृष्ण+एकत्वम् |
| हरेऽव | - | उप+इन्द्रः |

**८. यथोचितं योजयत ।**

| क | | ख |
|---|---|---|
| मरुल्लोलिता | - | तद् टीका |
| वागीशः | - | रामस् शेते |
| रामश्शेते | - | वाक् ईशः |
| तट्टीका | - | मरुत् लोलिता |

**९. सन्धिकार्ये रिक्तस्थानानि पूरयित्वा लिखतु ।**

सुधी + उपास्यः

सु ध् य् उपास्यः - .........................

सु ध् ध् य् उपास्यः - .........................

सु द् ध् य् उपास्यः - .........................

**१०. सूत्राणि व्याख्यात ।**

1. वृद्धिरेचि

पदच्छेदः - .........................................

सूत्रार्थः - .........................................

उदाहरणम् - .........................................

2. एङःपदान्तादति

पदच्छेदः - .........................................

सूत्रार्थः - .........................................

उदाहरणम् - .........................................

3. उरण् रपरः

पदच्छेदः - .........................................

सूत्रार्थः - .........................................

उदाहरणम् - .........................................

**११. अधोदत्तान् सूत्रार्थान् पठित्वा पेटिकायां दत्तैः सूत्रैः सह योजयित्वा लिखत ।**

सूत्रार्थाः -

1. प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः ।

2. क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

3. अवर्णान्तादुपसर्गाद् ऋकारादौ धातौ परे वृद्धिः एकादेशः स्यात् ।

4. दूरात् संबोधने वाक्यस्य टेः प्लुतः वा स्यात् ।

| दूराद्धूते च, उपसर्गादृति धातौ, भूवादयो धातवः, उपसर्गाः क्रियायोगे । |
| --- |

**१२. वलयमध्ये निर्दिष्टाः आदेशाः उचितैः उदाहरणैः सह योजयित्वा लिखित ।**

आदेशाः - अय् अव् आय् आव्

**उदा -** - हरे + ए = हरये ........................

विष्णो + ए = विष्णवे ........................

नै + अकः = नायकः ........................

पौ + अकः = पावकः ........................

**१३. अधः प्रदत्तेषु साधुः सूत्रार्थः कः?**

1. अचः परस्य यरः द्वे ।

2. परस्य यरः द्वे वा स्तः ।

3. अचः परस्य यरः द्वे वा स्तः नत्वचि ।

4. द्वे वा स्तः नत्वचि ।

A) 1 साधुः B) 2 साधुः

C) 3 साधुः D) 3, 4 साधुः

**१४. अधः प्रदत्तेषु साधु सन्धिकार्यं किम्?**

1. उप + इन्द्रः - उपेन्द्रः

2. उप + इन्द्रः - उपैन्द्रः

3. उप + इन्द्रः - उपांन्द्रः

4. उप + इन्द्रः - उप इन्द्रः

A) 1 साधुः  B) 2 साधुः

C) 3 साधुः  D) 4 साधुः

**१५. सन्धिकार्ये साधुतां लिखत।**

1. धातृ + अंशः - धात्रंशः - इकोयणचि

2. मधु + अरिः - मध्वरिः - एचोऽयवायवः

3. धातृ + अंशः - धात्रंशः - एचोऽयवायवः

4. मधु + अरिः - मध्वरिः - इकोयणचि

A) 1 & 4 साधुः  B) 1 & 2 साधुः

C) 3 & 4 साधुः  D) 2 & 3 साधुः

**१६. सूत्रार्थलेखने साधुतां परिशोधयत।**

1. क्रियावाचिनो भ्वादयो धातुसंज्ञं स्यात् - वृद्धिरेचि।

2. प्रादयः क्रियायोगे उपसर्गसंज्ञं स्यात् - वृद्धिरेचि।

3. प्रादयः क्रियायोगे उपसर्गसंज्ञं स्यात् - उपसर्गाः क्रियायोगे

4. क्रियावाचिनो भ्वादयो धातुसंज्ञं स्यात् - भूवादयो धातवः

A) 1 & 4 साधुः  B) 1 & 3 साधुः

C) 3 & 4 साधुः  D) 2 & 3 साधुः

**१७. धातुलेखने साधुतां परिशोधयत।**

1. भू - भवति

2. पठ् - पठति

3. गम्लृ - गमति

4. वद् - वदति

A) 1 & 4 साधुः  B) 2 & 3 साधुः

C) 3 & 4 साधुः  D) 1 & 2 साधुः

**१८. सूत्राणि सोदाहरणं व्याख्यात।**

| | | |
|---|---|---|
| 1. मोऽनुस्वारः | पदच्छेदः | ......................................... |
| | सूत्रार्थः | ......................................... |
| | उदाहरणम् | ......................................... |
| 2. झलां जशोऽन्ते | पदच्छेदः | ......................................... |
| | सूत्रार्थः | ......................................... |
| | उदाहरणम् | ......................................... |
| 3. यरोऽनुनासिकेऽनुनासिको वा | पदच्छेदः | ......................................... |
| | सूत्रार्थः | ......................................... |
| | उदाहरणम् | ......................................... |

**१९. सन्धिकार्ये उचितानि सूत्राणि पूरयत।**

शिवस् + अर्च्यः

शिवर् अर्च्यः - ....................

शिव उ अर्च्यः - ....................

शिवो आर्च्यः - ....................

शिवोऽर्च्यः - ....................

**२०. सन्धिकार्ये उचितानि सूत्राणि पूरयत।**

भोस् + देवाः

भोर् देवाः - ....................

भोय् देवाः - ....................

भो देवाः - ....................

**२१. समुचितमुत्तरं चित्वा लिखतु।**

| | |
|---|---|
| 1. वाक् + ईशः | क) रामष्टीकते |
| 2. रामस् + शेते | ख) चिन्मयम् |
| 3. चित् + मयम् | ग) रामश्शेते |
| 4. रामस् + टीकते | घ) वागीशः |

| | | | | |
|---|---|---|---|---|
| A) | 1- क) | 2.- ग) | 3. - ख) | 4. - घ) |
| B) | 1- ख) | 2.- घ) | 3. - ग) | 4. - क) |
| C) | 1- घ) | 2.- ग) | 3. - ख) | 4. - क) |
| D) | 1- ग) | 2.- क) | 3. - घ) | 4. - ख) |

**२२. अधोदत्तन् सूत्रार्थान् पठित्वा कोष्ठकात् उचितसूत्रैः सह योजयित्वा लिखत।**

(शि तुक्, नश्चापदान्तस्य झलि, तोर्लि, ष्टुना ष्टुः)

सूत्रार्थाः
स्तोः ष्टुना योगे ष्टुः स्यात्।
तवर्गस्य लकारे परे परसवर्णः स्यात्।
नस्य मस्य च अपदान्तस्य झल्यनुस्वारः।
पदान्तस्य नस्य शो परे तुग्वा स्यात्।

**२३. सन्धिकार्ये रिक्तस्थानानि पूरयत।**

शिवस् + वन्द्यः

......................... – ससजुषो रुः

शिव उ वन्द्यः – ....................

......................... – आद् गुणः

**२४. सन्धिकार्ये रिक्तस्थानानि पूरयत।**

भगोस् + नमस्ते

.................. – ससजुषो रुः

भगोय् नमस्ते – ................

भगो नमस्ते – हलिसर्वेषाम्

**२५. सूत्रांशान् पूरयत।**

1. भोभगोऽघोऽपूर्वस्य ..................... ।

2. ..................... पूर्वस्य दीर्घोऽणः ।

3. विप्रतिषेधे ..................... कार्यम् ।

4. एतत्तदोः सुलोपोऽको ..................... हलि ।

**२६. हरिस् + रम्यः इति सन्धिकार्ये स्खालित्यं चेत् निवारयत।**

हरिस्+रम्यः

हरिर् रम्यः – ढ्रलोपे पूर्वस्य दीर्घोऽणः

हरि रम्यः – ससजुषो रुः

हरी रम्यः – रो रि

**२७. अधो दत्तान् सूत्रार्थान् पठित्वा पेटिकायां दत्तैः सूत्रैः सह योजयित्वा लिखत।**

सूत्रार्थाः –

रेफस्य रेफे परे लोपः स्यात्।

अप्लुतादतः परस्य रोः उः स्यात् हशि।

अह्नो रेफादेशः स्यान्नतु सुपि।

खरि विसर्जनीयस्य सः स्यात्।

सूत्राणि

| |
|---|
| विसर्जनीयस्य सः, रोऽसुपि, |
| रो रि, हशि च। |

**२८. सूचनानुसारं सूत्रं व्याख्यात ।**

“अतोरोरप्लुतादप्लुते”

सूचना – रोः उः,   शिवोऽर्च्यः

**२९. समुचितमुत्तरं लिखत।**

भोस् + देवाः

1. भोर् देवाः - क) भो भगो अघोऽपूर्वस्ययोऽशि

2. भोय् देवाः - ख) हलि सर्वेषाम्

3. भो देवाः - ग) ससजुषो रुः

A) 1. - क) 2. - ख) 3. - ग)

B) 1. - ग) 2. - क) 3. - ख)

C) 1. - ग) 2. - ख) 3. - क)

D) 1. - ग) 2. - क) 3. - ख)

# एककम् - ३

## दर्शनसोपानम्

**आमुखम्**

सुखदुःखात्मकोऽयं लोकः। लोके सर्वत्र प्राचीनकालादेव सुखप्राप्तये आत्यन्तिकदुःखनिवृत्तये च चिन्तकाः उपायान् चिन्तयन्ति स्म। मोक्षप्राप्तिरेव आत्यन्तिकदुःखनिवारणमार्गः इति सर्वेषां भारतीयचिन्तकानां मतम्। तदर्थं ते विविधान् मार्गान् अन्विष्यन्ति स्म। एकैकेन आचार्येण स्वीयः पन्थाः आश्रितः आसीत्। अस्य अन्वेषणस्य फलमेव विविधानि दर्शनानि।

भारतीयदर्शनानि आस्तिकनास्तिकभेदेन द्विधा विभक्तानि। आस्तिकदर्शनानि वेदानां प्रामाणिकताम् अङ्गीकुर्वन्ति। नास्तिकानि न अङ्गीकुर्वन्ति।

अस्मिन् एकके त्रयः पाठाः सन्ति। प्रथमे सांख्य-योग-न्याय-वैशेषिकदर्शनानि अन्तर्भावितानि। द्वितीये पूर्वमीमांसा-उत्तरमीमांसादर्शने। तृतीये बौद्ध-जैन-चार्वाकानीति नास्तिकदर्शनानि च अन्तर्भावितानि।

पाठः - ६

# आस्तिकदर्शनानि भागः-१

**पाठप्रवेशः**

भारते ऋषयः दुःखनिवृत्तये कमुपायं निरदिशन्? तत्तद्दर्शनभेदेन विभिन्नान् उपायान् निरदिशन्। तेषु दर्शनेषु सांख्ययोगन्यायवैशेषिकाण्यधिकृत्य अस्मिन् पाठे पठामः।

**आमुखम्**

आत्यन्तिकी दुःखनिवृत्तिरेव मानवानां परमं लक्ष्यम्। तल्लक्ष्यप्राप्तये यत्तवन्तः ऋषयः। ते द्रष्टारः दार्शनिकाः इति च कथ्यन्ते। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति दर्शनस्य प्रवृत्तिः। तत्र "दृश्यते साक्षात्क्रियते प्रपञ्चतत्त्वम् अनेन" इति दर्शनशब्दस्य व्युत्पत्तिः। 'दृशिर् प्रेक्षणे' इति धातोर्निष्पन्नोऽयं दर्शनशब्दः। अत्र धातुः न केवलं चाक्षुषप्रत्यक्षबोधकः अपि तु ज्ञानसामान्यबोधकः।

## साङ्ख्यदर्शनम्

कपिलमुनिप्रणीतमिदं साङ्ख्यदर्शनम्। अत्र पञ्चविंशति तत्त्वानि प्रतिपाद्यन्ते। सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वम् अनेन इति व्युत्पत्त्या साङ्ख्यशब्दस्य सम्यग् ज्ञानमित्यर्थः। तच्च प्रकृतिपुरुषविवेक एव। कपिलमुनिः तस्य शिष्याय आसुरये साङ्ख्यतत्त्वमुक्तवान्। आसुरिः स्वशिष्याय पञ्चशिखाय प्रोक्तवान्। कपिलमुनिप्रणीतानि सांख्यसूत्राणि अद्यत्वे न उपलभ्यन्ते। दर्शनस्यास्य प्रामाणिकग्रन्थोऽस्ति ईश्वरकृष्णप्रणीता साङ्ख्यकारिका। तस्याः व्याख्या

साङ्ख्यतत्त्वकौमुदी। तत्कर्ता वाचस्पतिमिश्रः।




अत्र प्रकृतिः पुरुषश्चेति मुख्यतया तत्त्वद्वयमस्ति। अचेतना प्रकृतिः जगतः मूलं कारणम्। प्रकृतेः परिणाम एव प्रपञ्चः। चेतनः पुरुषः असङ्गः निष्क्रियश्च। प्रतिशरीरं पुरुषो भिन्न इति पुरुषबहुत्वमत्र स्वीक्रियते। साङ्ख्याः सत्कार्यवादम् अङ्गीकुर्वन्ति। वादस्तावत् उत्पत्तेः पूर्वं कार्यं कारणे आसीत् अनभिव्यक्ततया इति। तिले(कारणे) अनभिव्यक्तं तैलम् (कार्यं) एव पेषणादिव्यापारेण अभिव्यज्यत इति उदाहरणम्। आत्यन्तिकदुःखनिवृत्तिरेव मोक्षः। स च प्रकृतिपुरुषविवेकेन लभ्यते। त्रीणि च अत्र प्रमाणानि प्रत्यक्षम् अनुमानम् आगमश्चेति।

## योगदर्शनम्



पतञ्जलिमुनिप्रणीतमिदं योगदर्शनम्। 'समाधिः' इत्यर्थे 'युज्' धातोः योगशब्दः निष्पन्नः। 'योगश्चित्तवृत्तिनिरोध' इति योगलक्षणम्। वृत्तिस्तु चित्तपरिणामः। चित्तवृत्तिनिरोधस्य फलं योगः(समाधिः)। साङ्ख्ययोगदर्शनयोः सिद्धान्ते साम्यमस्ति। किन्तु योगे ईश्वर इति पुरुषविशेषः पञ्चविंशतितत्त्वातिरिक्ततया स्वीकृतः। अत एव सेश्वरसाङ्ख्यमिति अस्य नामान्तरम्। पतञ्जलिप्रणीतं योगसूत्रम् अस्य दर्शनस्य प्रामाणिको ग्रन्थः। समाधि-साधन-विभूति-कैवल्यानि इति चत्वारः पादास्तत्र। अथ योगानुशासनमिति आदिमं सूत्रम्। योगसूत्रभाष्यं व्यासेन कृतम्। सूत्रव्याख्यानत्वेन भोजकृता भोजवृत्तिरपि प्रसिद्धा।

प्रकृतिः पुरुषश्चेति मुख्यं तत्त्वद्वयम्। अचेतना प्रकृतिः प्रपञ्चस्य मूलकारणम्। सा पुरुषस्य भोगापवर्गार्थं प्रवर्तते। पुरुषः चेतनः असङ्गश्च। सांख्यदर्शनवत् दुःखस्य आत्यन्तिकनिवृत्तिरूपं कैवल्यमेव दर्शनलक्ष्यम्। तच्च प्रकृतिपुरुषविवेकेन भवति। ज्ञानप्राप्तये योगस्य अष्टाङ्गानि

निर्दिष्टानि। तानि च यमः नियमः आसनं प्राणायामः प्रत्याहारः धारणा ध्यानं समाधिश्चेति। प्रत्यक्षम् अनुमानं शब्दश्चेति प्रमाणत्रयमत्र स्वीक्रियते।

## न्यायदर्शनम्



गौतममुनिप्रणीतमिदं न्यायदर्शनम्। नीयते प्राप्यते बोध्यते प्रपञ्चतत्त्वम् अनेन इति न्यायशब्दस्य व्युत्पत्तिः। प्रमाणैरर्थपरीक्षणं न्याय इति वात्स्यायनः भाष्यकारः। न्यायस्य आन्वीक्षिकीति अपरं नाम। न्यायसूत्राणां प्रणेता गौतममुनिः। भाष्यं वात्स्यायनेन वार्त्तिकम् उद्योतकरेण च प्रणीतम्। तदिदं न्यायदर्शनं प्राचीन-नव्यभेदेन द्विविधम्। गौतममुनिप्रभृति गंगेशोपाध्यायस्य कालात् प्राग्यावत् प्राचीनन्यायः। गङ्गेशोपाध्यायात् प्रभृति नव्यन्यायश्च।

न्यायदर्शने प्रमाणादिषोडशपदार्थाः सन्ति। पदार्थानां तत्त्वज्ञानात् मोक्षो भवति। दुःखात्यन्तापायो हि मोक्षः। अत्र असत्कार्यवादः स्वीक्रियते। उत्पत्तेः पूर्वं कार्यम् असत् इति तात्पर्यम्। अविद्यमानं कार्यमेव पुनः व्यापारेण आरभ्यते(उत्पद्यते)। अतः आरम्भवाद इत्यपि कथ्यते। कारणात् नूतनं कार्यम् उत्पद्यते। उत्पत्तेः पूर्वम् अविद्यमानो घटः चक्रादिव्यापारेण उत्पद्यते। प्रत्यक्षम् अनुमानम् उपमानं शब्दश्चेति चत्वारि प्रमाणानि।

## वैशेषिकदर्शनम्



कणादमुनिप्रणीतमिदम् वैशेषिकदर्शनम्। कणादस्यापरं नाम उलूकः। तेन प्रोक्तमित्यर्थे दर्शनमिदम् औलूक्यदर्शनमित्यपि कथ्यते। विशेष इति पदार्थस्वीकारात् अस्य वैशेषिकमित्यपि नामान्तरम्। इतरशास्त्रोपकारकत्वात् 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति प्रथा। न्यायवैशेषिकसिद्धान्तयोः साम्यमस्ति। न्याये प्रमाणानां प्राधान्यं वैशेषिके प्रमेयानाञ्चेति भेदः। वैशेषिकदर्शने द्रव्यादिसप्तपदार्थाः प्रतिपाद्यन्ते।

परमाणवः जगतः कारणमिति कणादमतम्। परमाणुषु एव पाकः इति वैशेषिकाः। अतः ते पीलुपाकवादिनः। दर्शनस्य परमं लक्ष्यं मोक्ष एव। स च द्रव्यादिपदार्थानां तत्त्वज्ञानात् लभ्यते। द्विविधा च अस्य दर्शनस्य भाष्यसरणिः। प्रथमसरण्यां

मुख्यो भवति प्रशस्तपादः। भाष्यस्य नाम पदार्थधर्मसंग्रहः इति। द्वितीयसरण्यां प्रसिद्धो भवति शङ्करमिश्रः। तेन विरचितं भाष्यं भवति उपस्कारः। प्रत्यक्षम् अनुमानञ्चेति द्वे प्रमाणे अत्र स्वीक्रियेते।

## पठनप्रवर्तनानि

- **सांख्यदर्शनं तस्य आचार्यपरम्परां चाधिकृत्य लघुटिप्पणीम् आरचयतु।**

  श्रद्धेयाः अंशाः -
  - आशयप्रकाशनम्।
  - मुख्यानाम् अंशानां सूचनम्।
  - स्पष्टतया लेखनम्।

- **प्रकृतिपुरुषयोः प्रधान्यं चर्चित्वा टिप्पणीम् आरचयतु।**

  श्रद्धेयाः अंशाः -
  - आशयप्रकाशनम्।
  - चर्चायां भागभाक्त्वम्।
  - चर्चायां समाकलितानाम् आशयानाम् अवतारणम्।
  - स्पष्टतया लेखनम्।

- **सांख्यमतानुसारं कार्योत्पत्तिम् अधिकृत्य संगोष्ठीम् चालयित्वा आवेदनपत्रम् आरचयतु।**

  श्रद्धेयाः अंशाः -
  - आशयप्रकाशनम्।
  - आशयानां क्रोडीकरणम्।
  - आशयव्यक्तता।
  - आवेदनपत्रस्वरूपम्।

- **आधुनिककाले योगदर्शनस्य प्राधान्यमधिकृत्य चर्चित्वा टिप्पणीं लिखतु।**

  श्रद्धेयाः अंशाः -
  - आशयप्रकाशनम्।
  - चर्चायां भागभाक्त्वम्।
  - समाहृतानाम् आशयानां प्रस्तुतीकरणम्।
  - आशयव्यक्तता।

- **योगदर्शनस्य आचार्यानधिकृत्य चार्ट्पत्रम् प्रदर्शयतु ।**

  श्रद्धेयाः अंशाः -
  - दत्तानां सञ्चयः ।
  - दत्तानां विन्यासः ।

- **सांख्ययोगदर्शनयोः सादृश्यम् अधिकृत्य संगोष्ठीं चालयित्वा आवेदनपत्रं लिखतु ।**

  श्रद्धेयाः अंशाः -
  - आशयप्रकाशनम् ।
  - चर्चायां भागभाक्त्वम् ।
  - सादृश्यानां पट्टिकाकरणम् ।
  - आशयव्यक्तता ।

- **असत्कार्यवादम् अधिकृत्य भाषणम् आयोजयत, टिप्पणीं लिखतु ।**

  श्रद्धेयाः अंशाः -
  - मुख्यानाम् अंशानां प्रतिपादनम् ।
  - नैरन्तर्यम् ।
  - भाषाशुद्धिः ।

- **"द्रव्यादिपदार्थानां तत्त्वज्ञानात् मोक्षःलभ्यते ।" विषयमिमम् अधिकृत्य पाठाधारेण चर्चां कृत्वा टिप्पणीं लिखतु ।**

  श्रद्धेयांशाः-
  - आशयप्रकाशनम् ।
  - चर्चायां भागभाक्त्वम् ।
  - आशयव्यक्तता ।

**दुःखनिवृत्तये ऋषिभिः निर्दिष्टाः चतस्रः चिन्तासरण्यः पठितवन्तः किल? ताः भौतिकान् दुःखान् दूरीकर्तुं प्रयत्नं कृतवत्यः। परन्तु आत्मानम् अधिकृत्य चर्चा अग्रे जाता। इदानीं गहनतराः अमूर्ताः चिन्तापद्धतीः अधिकृत्य चर्चां कुरुत।**

पाठः - ७

# आस्तिकदर्शनानि भागः-२

**पाठप्रवेशः**

मानवजीवनस्य लक्ष्यं किम्? भौतिकेन एव विकासेन जीवने सन्तुष्टाः भवेम किम्? वैकारिकसन्तुलनं जीवने आवश्यकं वा? तत् कथं प्राप्नुयाम?

**आमुखम्**

भारतीयदर्शनेषु आस्तिकदर्शनानि षडिति पूर्वमुक्तम्। तेषु चत्वार्यधिकृत्य प्रथमपाठे पठितम्। अस्मिन् पाठे पूर्वोत्तरमीमांसादर्शने पठामः। ऋषिभिः उक्तेषु दुःखनिवृत्त्युपायेषु केचन उपायाः पूर्वमीमांसोत्तरमीमांसयोः निबद्धाः। तान् इदानीं पठामः।

## पूर्वमीमांसा

**दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत।**

पूर्वमीमांसादर्शनं जैमिनिमुनिप्रणीतम्। मीमांसाशब्दस्य 'पूजितविचार' इत्यर्थः। कर्मकाण्डज्ञानकाण्डभेदेन वेदस्य भागद्वयमस्ति। पूर्वभागे कर्मकाण्डे प्रवृत्तिधर्मः विचार्यते। तदधिकृत्य विचारः पूर्वमीमांसया क्रियते। उत्तरभागे ज्ञानकाण्डे निवृत्तिधर्मः प्रतिपाद्यते। तदधिकृत्य चिन्तनम् उत्तरमीमांसया क्रियते। कर्मविचारपरत्वात् कर्ममीमांसा हि पूर्वमीमांसा। तत्र मुख्यतया धर्मः प्रतिपाद्यते। 'अथातो धर्मजिज्ञासा' इति आदिमं सूत्रम्। सूत्राणि जैमिनिना विरचितानि। तानि द्वादशाध्यायैः विभक्तानीति कारणात् द्वादशलक्षणी इति ग्रन्थस्य नाम।

सूत्राणां भाष्यं शबरस्वामिना कृतम्। अतः शाबरभाष्यमित्युच्यते। तदाधारेण कुमारिलभट्टेन श्लोकवार्तिकं रचितम्। तस्य शिष्येण प्रभाकरेणापि भाष्योपरि बृहती तथा लघ्वी इति टीकाद्वयं कृतम्। मीमांसादर्शनस्य पोषणाय अनयोरुभयोरपि योगदानं महदस्ति। सिद्धान्ते उभयोः मतभेदमाश्रित्य सम्प्रदायद्वयं प्रसिद्धमभवत्। कुमारिलभट्टस्य भाट्टसम्प्रदायः प्रभाकरस्य गुरुसम्प्रदायश्चेति। तदतिरिच्य मुरारिमिश्रस्य मिश्रसम्प्रदायोऽप्यस्ति। अत्र मीमांसादर्शने पञ्च प्रमाणानि अङ्गीक्रियन्ते। तानि प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिश्चेति।

**ब्रह्म सत्यं जगन्मिथ्या**
**जीवो ब्रह्मैव नापरः।**

## उत्तरमीमांसा

व्यासमुनिप्रणीतमिदम् उत्तरमीमांसादर्शनम्। वेदान्तदर्शनं हि उत्तरमीमांसा। वेदस्य उत्तरभागस्थां ब्रह्मविद्यां प्रतिपादयतीति कारणात् उत्तरमीमांसा। सा च ब्रह्मविद्या वेदस्य अन्ते उपलभ्यते इति कारणात् वेदान्त इति संज्ञा। वेदान्तशब्देन मुख्यतया उपनिषदः गृह्यन्ते। तासां तात्पर्यं बोधयितुं ब्रह्मसूत्राणि प्रणीतानि। तानि च चतुर्षु अध्यायेषु विभक्तानि। समन्वय-अविरोध-साधन-फलभेदेन चत्वारः अध्यायाः। प्रत्यध्यायं चत्वारः पादाः सन्ति। पादाश्च अधिकरणैः युक्ताश्च। ब्रह्मसूत्रस्य शारीरकसूत्रं वेदान्तसूत्रमिति च नामान्तरे।

वेदान्तदर्शनस्य परमं तात्पर्यं ब्रह्म एव। तच्च ब्रह्म जगतः कारणमिति प्रस्थानत्रयेण समर्थ्यते। श्रुति-स्मृति-न्यायभेदेन त्रीणि प्रस्थानानि। उपनिषदः श्रुतिप्रस्थाने भगवद्गीता स्मृतिप्रस्थाने ब्रह्मसूत्राणि न्यायप्रस्थाने चान्तर्भवन्ति। तत्र श्रुतिप्रस्थानम् अतिप्रधानमेव। प्रस्थानत्रयमाश्रित्य बहवः आचार्याः भाष्याणि अरचयन्। आचार्याणां मतभेदेन द्वैतम् अद्वैतम् विशिष्टाद्वैतम् इत्येवं विभिन्नानि मतानि जातानि। मध्वाचार्यः शङ्कराचार्यः रामानुजाचार्यश्चेति यथाक्रमं तेषां प्रवर्तकाः सन्ति। उत्तरमीमांसादर्शने षट् प्रमाणानि अङ्गीक्रियन्ते। तानि च प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिः अनुपलब्धिश्च।

## पठनप्रवर्तनानि

- **पाठं पठित्वा " कर्मविचारपरत्वात् कर्ममीमांसा हि पूर्वमीमांसा" इति विषयमधिकृत्य सङ्गोष्ठीम् आयोजयित्वा आवेदनपत्रं लिखतु ।**

  श्रद्धेयांशाः-
  - आशयप्रकाशनम् ।
  - चर्चायां भागभाक्त्वम् ।
  - मुख्यांशानां प्रतिपादनम् ।
  - भाषाशुद्धिः ।

- **पाठाधारेण वेदान्ते प्रस्थानत्रयमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु ।**

  श्रद्धेयांशाः-
  - आशयप्रकाशनम् ।
  - चर्चायां भागभाक्त्वम् ।
  - भाषाशुद्धिः ।

- **प्रस्थानत्रयमाश्रित्य बहवः आचार्याः भाष्याणि अरचयन् । अत्र सूचितानां प्रमुखानां आचार्याणां नाम्नां ग्रन्थानां च पट्टिकां (संस्कृतसाहित्येतिहास इत्यस्य ग्रन्थस्य साहाय्येन) करोतु ।**

  श्रद्धेयांशाः-
  - संस्कृतसाहित्येतिहासस्य परामर्शनम् ।
  - मुख्यानाम् आचार्याणां ग्रन्थानां च सूचनम् ।
  - दत्तानां विन्यासः ।

- **अधः प्रदत्तयोः टिप्पणीं लिखतु ।**

  **क) पूर्वमीमांसा** **ख) उत्तरमीमांसा**

  श्रद्धेयांशाः-
  - भाषाशुद्धिः ।
  - भाषाशैली ।
  - आशयपूर्णता ।

**इतः पर्यन्तं पठितानि षड् दर्शनानि वेदप्रामाण्यम् अङ्गीकुर्वन्ति। यानि वेदप्रामाण्यं न अङ्गीकुर्वन्ति तादृशानि दर्शनानि सन्ति वा? चर्चां कुरुत।**

पाठः - ८

# नास्तिकदर्शनानि

**पाठप्रवेशः**

आस्तिकदर्शनानि अधीतानि वा? अधुना नास्तिकदर्शनान्यधिकृत्य पठामः।

**आमुखम्**

वेदप्रामाण्यमङ्गीकुर्वन्ति दर्शनानि आस्तिकानि। यानि वेदप्रामाण्यं न अङ्गीकुर्वन्ति तानि नास्तिकानि। तानि चार्वाक-जैन-बौद्धदर्शनानि।

**यावज्जीवेत् सुखं जीवेत्**
**ऋणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य**
**पुनरागमनं कुतः ?**

## चार्वाकदर्शनम्

प्राचीनतमं भवति नास्तिकदर्शनम्। आदौ देवगुरुः बृहस्पतिः एतद् दर्शनम् उपदिष्टवान्। ततश्च चार्वाकः अस्य प्रचारं कृतवान्। अतः चार्वाकदर्शनमिति संज्ञा प्राप्ता। लोके अधिकं प्रचरितमिति कारणात् लोकायतदर्शनमिति अस्य अपरं नाम । एतन्मते मरणमेव मोक्षः। मरणात् परं किमपि नास्ति। परलोकं पुनर्जन्म वा नैते अङ्गीकुर्वन्ति। भस्मीभूतस्य देहस्य पुनरागमनं नास्तीति तेषां विश्वासः। शरीरमेव आत्मा भवति। शरीरभिन्नः आत्मा नाङ्गीक्रियते। शरीरस्य विनाशे आत्मनः नाशो भवति। अतः शरीरात्मवादोऽत्र प्रसिद्धः।

सुखदुःखे स्वभावतः सम्भवतः। धर्माधर्मौ तत्र कारणे न भवतः। विषयाणाम् आनुकूल्ये स्वर्गः प्रातिकूल्ये नरकश्च। यावज्जीवेत् सुखं जीवेदिति तेषां सङ्कल्पः। ऋणं कृत्वापि जीवनं सुखेन नयेदिति

तेषाम् अभ्युपगमः। अत एते सुखवादिनः। काम एक एव पुरुषार्थ इह। भूमिवार्यनलानिला इति भूतचतुष्टयमेव अस्मिन् दर्शने। आकाशो न प्रत्यक्षम्। अतः स न स्वीक्रियते।

प्रपञ्चोत्पत्तिः स्वभावतो भवति। नास्ति तत्र कारणान्तरम्। प्रपञ्चकर्ता कश्चन ईश्वरो नास्ति। एतन्मते प्रत्यक्षदृष्टः राजैव ईश्वरः। प्रत्यक्षमेकमेव प्रमाणम्। इन्द्रियैः येषां वस्तूनाम् अनुभवः तानि सन्ति। ये इन्द्रियाणाम् अविषयाः ते कल्पिता एव।

## जैनदर्शनम्



जिनसम्बन्धात् जैनमिति संज्ञा। रागादिषड् रिपून् जितवान् जिनः। तत्सम्बन्धि जैनम्। आर्हतदर्शनमिति अपरं नाम। सिद्धपुरुषाः अर्हच्छब्देन व्यवह्रियन्ते। तैः प्रचारितमिति आर्हतम्। जैनसिद्धान्तस्य प्रचारकाः तीर्थङ्करा इत्युच्यन्ते। तीर्थङ्करेषु ऋषभदेवः प्रथमः अन्तिमो महावीरश्च। महावीरस्य वास्तविकं नाम वर्धमान इति। द्वादशवर्षपर्यन्तं कठिनं तपः कृतमिति कारणात् महावीरोऽभवत्।

शरीरातिरिक्तम् अभौतिकं तत्त्वम् आत्मा इति स्वीक्रियते। शरीरचैतन्ययोः विविच्य ज्ञानं नास्ति इत्येतद् बन्धस्य कारणं भवति। तद्विवेकेन मोक्षश्च। अनेकान्तवादः कश्चित् मुख्यः सिद्धान्तः स्वीक्रियते। न एकान्तः अनेकान्तः। वस्तु अनन्तधर्मयुक्तम् अस्ति। अतः द्रव्यस्य स्वरूपं केनचिदेकेन प्रकारेण निर्णेतुं न शक्यत इत्यभ्युपगमात् अनेकान्तवादः। तदाधारेण स्याद्वादः प्रसिद्धिमवाप। स्यात् शब्दस्य कयाचित् दृष्ट्या इत्यर्थः। एकस्मिन् सन्दर्भे एकं वस्तु यथा प्रतीतं सन्दर्भान्तरे अन्यथा प्रतीयते अपरस्य वा। गजस्य पादं स्पृष्ट्वा स्तम्भ इति प्रतीतिः उदरं स्पृष्ट्वा भित्तिरिति प्रतीतिः यथा। कयाचित् दृष्ट्या गजः स्तम्भ इव अपरया दृष्ट्या भित्तिरिव। स्याद्वादः सप्तविध इति कारणात् सप्तभङ्गीनय इति अपरं नाम अस्य वादस्य।

दर्शनेऽस्मिन् बन्धमोक्षयोर्विचारः प्रस्तूयते। शरीरमेव बन्धनम्। बन्धनाशेन कैवल्यं भवति। तदर्थं मार्गत्रयमुपदिष्टम्। सम्यक् दर्शनं सम्यक् ज्ञानं सम्यक् चरित्रं (उचितम् आचरणम्) चेति। एतदेव रत्नत्रयमित्युच्यते। एतन्मते प्रत्यक्षानुमानागमाः प्रमाणानि। तीर्थङ्कराणाम् उपदेश एव अत्र आगमः।

## बौद्धदर्शनम्



गौतमबुद्धः अस्य दर्शनस्य प्रवर्तको भवति। कपिलवस्तुनरेशस्य शुद्धोदनस्य पुत्रस्याऽस्य पूर्वनाम सिद्धार्थ इत्यासीत्। बाल्यकाले एव विषयेषु विरक्तः स दुःखनिवृत्तेः तथा शाश्वतसुखस्य च अन्वेषणं कृतवान्। बौद्धदर्शनस्य प्रचारः प्रसारश्च पालिभाषया आसीत्। बुद्धेन पालिभाषया कृतानामुपदेशानां तदनुयायिभिः संग्रहणं कृतम्। तादृशोपदेशसंग्रहा एव त्रिपिटकमिति नाम्ना प्रसिद्धाः। विनयपिटकं सुत्तपिटकम् अभिधम्मपिटकमिति पिटकत्रयम्। आचरणसम्बद्धोपदेशाः विनयपिटके सन्ति। सुत्तपिटके धर्मोपदेशाः प्राप्यन्ते। अभिधम्मपिटके दार्शनिकविचाराश्च।

दर्शनेऽस्मिन् चत्वारि आर्यसत्यानि सन्ति। दुःखं दुःखसमुदयः दुःखनिरोधमार्गः दुःखनिरोधश्चेति। बुद्धोपदिष्टानि सत्यान्येव आर्यसत्यानि इत्यभिधीयन्ते। एतेषाम् आर्यसत्यानाम् अवगमनेन आचरणेन च दुःखनिवृत्तिर्भवति। सर्वत्र दुःखमस्ति। दुःखस्य उत्पत्तिकारणं हि दुःखसमुदयः। दुःखापनयने उपाया एव दुःखनिरोधमार्गः। दुःखनिवृत्तये अष्टाङ्गमार्गः प्रसिद्धः। ते तु अष्टाङ्गमार्गाः सम्यग् दृष्टिः सम्यक् सङ्कल्पः सम्यग् वचनं सम्यक् कर्म सम्यग् जीवनं सम्यग् व्यायामः सम्यक् स्मृतिः सम्यक् समाधिश्च। दुःखानाम् आत्यन्तिकनिवृत्तिरेव मोक्षः। स एव निर्वाणमित्युच्यते।

बौद्धमते प्रपञ्चः अनित्यः प्रतिक्षणं परिणामशाली च। प्रपञ्चे सर्वमपि क्षणिकमिति कथयति प्रसिद्धः क्षणिकवादः। बौद्धदर्शने मतभेदमाश्रित्य चत्वारः सम्प्रदायाः समुत्पन्नाः। वैभाषिकाः सौत्रान्तिकाः योगाचाराः माध्यमिकाश्चेति। माध्यमिकाभिमतः शून्यवादोऽपि प्रसिद्ध एव। शून्यत्वं भावात्मकं तत्त्वमस्ति नतु अभावात्मकम्। प्रत्यक्षम् अनुमानञ्चेति प्रमाणद्वयमत्र स्वीक्रियते।

| दर्शनम् | आस्तिकम् | **साङ्ख्यम्** | **योगः** | **न्यायः** | **वैशेषिकम्** | **पूर्वमीमांसा** | **उत्तरमीमांसा** |
|---|---|---|---|---|---|---|---|
| | | कपिलः | पतञ्जलिः | गौतमः | कणादः | जैमिनिः | बादरायणः |
| | नास्तिकम् | **चार्वाकम्** | **जैनम्** | **बौद्धम्** | | | |
| | | बृहस्पतिः | ऋषभदेवः | श्रीबुद्धः | | | |

## पठनप्रवर्तनानि

- **नास्तिकदर्शनानि तेषामाचार्यान् चाधिकृत्य लघूपन्यासं लिखतु।**

  श्रद्धेयाः अंशाः -
  - मुख्यांशानां प्रतिपादनम्।
  - मुख्यांशानां विशदीकरणम्।
  - उपन्यासस्य स्वरूपम्।
  - भाषाशुद्धिः
  - भाषाशैली।

- **नास्तिकदर्शनानि पठित्वा तेषां मतभेदानधिकृत्य चर्चां कुरुत, संगोष्ठीं प्रचालयतु।**

  श्रद्धेयाः अंशाः -
  - आशयप्रकाशनम्।
  - चर्चायां भागभाक्त्वम्।
  - मतभेदानां विवेचनम्।

- **जैनदर्शनस्य प्रतिपाद्यमधिकृत्य टिप्पणीं लिखतु।**

  श्रद्धेयाः अंशाः -
  - मुख्यानाम् अंशानां प्रतिपादनम्।
  - भाषाशुद्धिः।

- **चार्वाकबौद्धदर्शने पठित्वा तयोः भेदमधिकृत्य चर्चां कुरुत, टिप्पणीं लिखतु।**

  श्रद्धेयाः अंशाः -
  - आशयपूर्णता।
  - विवेचनसामर्थ्यम्।
  - भागभाक्त्वम्।

**प्रपञ्चे विद्यमानानां सर्वेषां वस्तूनां भावाभावविषयमधिकृत्य चिन्तितं वा? तर्हि तदधिकृत्य चर्चां कुरुत।**

## अभ्यासप्रश्नाः

१. अधोदत्ताः प्रस्तावनाः पठित्वा प्रदत्तेषु विकल्पेषु समुचितमुत्तरं चित्वा लिखत।

क. कपिलमुनिः सांख्यदर्शनस्य आचार्यः भवति।

ख. सांख्यकारिकायाः कर्ता भवति वाचस्पतिमिश्रः।

A. क साधुः ख असाधुः। B. उभयमपि साधुः।

C. उभयमपि असाधुः। D. क असाधुः ख साधुः।

२. अधोदत्ताः प्रस्तावनाः पठित्वा प्रदत्तेषु विकल्पेषु साधुः कः इति चित्वा लिखत।

क. सांख्याः असत्कार्यवादिनः॥

ख. नैयायिकाः सत्कार्यवादिनः।

A, उभयमपि साधुः। B. उभयमपि असाधुः।

C. क साधुः ख असाधुः। D. क असाधुः ख साधुः।

३. अधः प्रदत्तां पट्टिकां पठित्वा दत्तेषु युग्मेषु समीचीनं चित्वा लिखत।

| आचार्यः | ग्रन्थः |
|---|---|
| क. व्यासः | प.न्यायसूत्रभाष्यम् |
| ख. ईश्वरकृष्णः | फ. सांख्यतत्त्वकौमुदी |
| ग.वाचस्पतिमिश्रः | ब. सांख्यकारिका |
| घ. वात्स्यायनः | भ. योगसूत्रभाष्यम् |

1. क – प, ख – फ, ग – ब, घ – भ
2. क – भ, ख – ब, ग – फ, घ – प
3. क – फ, ख – ब, ग – भ, घ – प
4. क – ब, ख – भ, ग – प, घ – फ

४. यथोचितं योजयत।

| क | ख |
|---|---|
| 1. कैवल्यम् | असत्कार्यवादः |
| 2. सांख्यम् | चित्तवृत्तिनिरोधः |
| 3. योगः | प्रकृतिपुरुषविवेकः |
| 4. न्यायः | सत्कार्यवादः |

५. कः गणे न अन्तर्भवति?

सांख्यदर्शनम्, योगदर्शनम् , वैशेषिकदर्शनम्, चार्वाकदर्शनम् ।

६. अधो दत्ताः प्रस्तावनाः पठित्वा प्रदत्तेषु विकल्पेषु समुचितमुत्तरं चित्वा लिखत ।

१) वैशेषिकदर्शनम् कणादमुनिप्रणीतं भवति ।

२) साङ्ख्यदर्शनस्य अपरनाम औलूक्यदर्शनमिति ।

३) वैशेषिकदर्शनम् आस्तिकदर्शनं भवति ।

A. १) असाधुः, २) साधुः, ३) असाधुः ।
B. १) साधुः, २) साधुः, ३) असाधुः ।
C. १) साधुः, २) असाधुः, ३) साधुः ।
D. तिस्रः अपि प्रस्तावनाः साधुः ।

७. अधो दत्ताः प्रस्तावनाः पठित्वा प्रदत्तेषु विकल्पेषु समुचितमुत्तरं चित्वा लिखत ।

१) वैशेषिकदर्शने द्रव्यादिसप्तपदार्थाः प्रतिपाद्यन्ते ।

२) प्रशस्तपादभाष्यस्य कर्ता प्रशस्तपादः ।

३) पूर्वमीमांसादर्शनं कपिलमुनिना प्रणीतम् ।

A. १) साधुः, २) साधुः, ३) असाधुः
B. १) असाधुः, २) असाधुः, ३) साधुः
C. १) साधुः, २) असाधुः, ३) असाधुः
D. १) असाधुः, २) साधुः, ३) साधुः

८. अधो दत्ताः प्रस्तावनाः पठित्वा प्रदत्तेषु विकल्पेषु समुचितमुत्तरं चित्वा लिखत ।

१) पूर्वमीमांसादर्शने षड् प्रमाणानि ।

२) वैशेषिकदर्शने द्वे एव प्रमाणे ।

३) वेदन्तदर्शने षड् प्रमाणानि ।

A. १) साधुः, २) असाधुः, ३) साधुः
B. १) असाधुः, २) साधुः, ३) साधुः
C. १) साधुः, २) साधुः, ३) असाधुः
D. सर्वाः अपि प्रस्तावनाः साधुः ।

९. अधः प्रदत्तां पट्टिकां पठित्वा प्रदत्तेषु युग्मेषु समीचीनं चित्वा लिखत।

| | |
|---|---|
| क) कणादः | च) वेदान्तः |
| ख) जैमिनिः | छ) उलूकः |
| ग) व्यासः | ज) पूर्वमीमांसा |

A. क) – छ), ख) – ज), ग) – च)

B. क) – च), ख) – छ), ग) – ज)

C. क) – ज), ख) – च, ग) – छ)

D. क) – च), ख) – ज, ग) – छ)

**१०. अधः प्रदत्तां पट्टिकां पठित्वा प्रदत्तेषु युग्मेषु समीचीनं चित्वा लिखत।**

| | |
|---|---|
| क) मध्वाचार्यः | च) विशिष्टाद्वैतम् |
| ख) शङ्कराचार्यः | छ) द्वैतम् |
| ग) रामानुजाचार्यः | ज) अद्वैतम् |

A. क) – ज), ख) – च), ग) – छ)

B. क) – च), ख) – छ), ग) – ज)

C. क) – छ), ख) – ज), ग) – च)

D. क) – छ), ख) – च), ग) – ज)

११. नास्तिकदर्शनेषु अन्यतमं भवति --------------।

A. सांख्यम्    B. चार्वाकम्,

C. न्यायः,    D. पूर्वमीमांसा

१२. भस्मीभूतस्य देहस्य पुनरागमनं नास्ति इति केषां विश्वासः?

A. योगाचाराणाम्    B. सांख्यानाम्

C. चार्वाकाणाम्    D. वैशेषिकाणाम्

१३. रागादयः षड् रिपवः सन्तीति केषां मतम्?

A. बौद्धानाम्    B. मीमांसकानाम्

C. जैनानाम्    D. सांख्यानाम्

१४. जैनसिद्धान्तस्य प्रचारकाः ----------- इत्युच्यन्ते।

A. बौद्धाः B. धर्मोपदेशकाः

C. तीर्थङ्कराः D. चार्वाकाः

१५. सुत्तपिटके--------------प्राप्यन्ते।

A. आचरणोपदेशाः B. धर्मोपदेशाः

C. सदुपदेशाः D. असदुपदेशाः

# एककम् ४
# तर्कशास्त्रम्

## आमुखम्

वैदिकदर्शनानि षडिति पठितम् । तेषु सांख्ययोगौ न्यायवैशेषिके पूर्वोत्तरमीमांसे च समानतन्त्राणीत्युच्यते इतिहासकारैः । समानतन्त्रयोः न्यायवैशेषिकयोः समन्वयेन तर्कशात्रमिति प्रथाम् अलभत । तत्र अर्वाचीनैः बहवः प्रकरणग्रन्थाः विरचिताः । तेषु उदयनाचार्यस्य लक्षणावली, लौगाक्षिभास्करस्य तर्ककौमुदी, भासर्वज्ञस्य न्यायसारः, श्रीवरदराजस्य तार्किकरक्षा, शशधरस्य न्यायसिद्धान्तदीपः जगदीशभट्टाचार्यस्य तर्कामृतम्, केशवमिश्रस्य तर्कभाषा, विश्वनाथपञ्चाननस्य भाषापरिच्छेदः अथवा न्यायसिद्धान्तमुक्तावली, अन्नंभट्टस्य तर्कसंग्रहः, अनन्तनारायणशास्त्रिणः तर्कसारः इत्यादयः प्रमुखाः ।

पाठः - ९

# पदार्थपरिचयः

**पाठप्रवेशः**

दर्शनान्यधिकृत्य किञ्चिदवगतं किल ।आम् । तार्किकमतानुसारं पदार्थान् परिचिनुमः । आचार्येण पि. एस्. अनन्तनारायणशास्त्रिमहोदयेन रचितात् तर्कसारात् उद्धृतोऽयं पाठः ।

**आमुखम्**

लोके विद्यमानानि सर्वाणि वस्तूनि सप्तपदार्थेषु अन्तर्भूतानीति तार्किकाणां मतम् । तेषु षट् भावपदार्थाः । अन्तिमः अभावः च ।

**तर्कसारः**

**चराचरात्मकम् इदमखिलं जगत् सप्तभिः पदार्थैः संकलितमिति तर्कसिद्धान्तः। न हि तत्रानन्तर्भूतं किमपि वस्तु लोके वर्तते। ते च द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावसंज्ञकाः सप्तपदार्थाः ।**

**टिप्पणी** –

अस्य जगतः सप्तपदार्थेष्वेव अन्तर्भावः कल्पितः। तेष्वनन्तर्भूतं न किमपि वस्तु अस्ति अस्मिन् जगति। द्रव्यं गुणः कर्म सामान्यं विशेषः समवायः अभावः इत्येवं तेषां संज्ञा। पदस्य अर्थः पदार्थः इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणम् उच्यते वैशेषिकैः।



अभिधेयत्वं नाम प्रमाविषयत्वम् ।

**तर्कसारः**

**एतेषु प्रथमे षट् भावपदार्था इति चरमः पुनरभावपदार्थ इति च वक्तुं शक्यते । भावपदार्थानां प्रायशोऽनन्यसापेक्षा सत्ता विद्यते । अभावस्तु सर्वदैव वस्त्वन्तरसापेक्षः । न ह्यभाव इत्येव कश्चिदस्तीति अस्माकमनुभवोऽस्ति । किन्तु जलस्याभावः, प्रकाशस्याभावः इत्यादिरीत्या यस्य कस्यापि भाववस्तुनोऽभाव एवास्माकम् अनुभवगोचरो भवति ।**

**टिप्पणी –**

सप्तपदार्थेषु आद्याष्षड् भावपदार्थाः । अन्तिमः सप्तमः च अभावः । भावपदार्थानां द्रव्यादीनां षण्णाम् सत्तायां पदार्थान्तरं नापेक्षते। सप्तमः पदार्थः अभावः सर्वदा एव पदार्थान्तरसापेक्षः । तथाहि घटाभावादिकं घटादिप्रतियोगिनं सदापि अपेक्षत एव। यद्यपि अभाव इति कश्चिन्नास्तीति अस्माकमनुभवः तथापि घटाभावः, जलाभावः इति कश्चिदनुभवोऽप्यस्ति। अतः भाववस्तुन एव अभाव इति ज्ञायते ।

**तर्कसारः –**

**भावपदार्थेषु च पृथग्जनानाम् अनुभवाविषयाः शास्त्रवासनामात्रसंवेद्याः सन्ति कतिपये पदार्थाः । येषु प्राथम्यमर्हति विशेषनामा पदार्थः । स हि नित्यद्रव्येषु वर्तते इति तार्किकाः प्रतिजानन्ति ।**

**सामान्यं तु सदृशप्रतीतिविषयेषु बहुषु वस्तुषु विद्यमानः साधारणो धर्मः । यथा – बहुषु गोव्यक्तिषु विद्यमानं गोत्वं सामान्यम्। एवं द्रव्यत्वं, गुणत्वं, घटत्वं, पटत्वमित्यादिकं सामान्यान्तर्भूतमेव ।**

**टिप्पणी –**

दर्शनेऽस्मिन् षड् भावपदार्थाः सन्ति। तेषु केचन जनानां न अनुभवगोचराः। पदार्थाः ते तर्कशास्त्रमतानुसारमेव ज्ञेयाः । तेषु मुख्यो भवति विशेषः । विशेषनामानं पदार्थमङ्गीकृत्य प्रवृत्तत्वात् वैशेषिकदर्शनस्य वैशेषिकमिति सा अन्वर्था संज्ञा। नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः। तत्र पृथिव्यादि चतुष्टयस्य परमाणवः आकाशादिपञ्चकं च नित्यद्रव्याणि ।

समानानां भावः सामान्यम् । सदृशेषु अनेकेषु वर्तमानः यः समानधर्मः सः सामान्यमिति कथ्यते । तच्च सामान्यं नित्यम् एकम् अनेकेषु समवायनामकेन नित्यसम्बन्धेन वर्तमानञ्च । अत एव द्रव्यत्व घटत्व

पटत्वादीनां सामान्येऽन्तर्भावः। उक्तञ्च - नित्यमेकमनेकानुगतं सामान्यम् इति।

**तर्कसारः -**

**द्रव्यादिव्यक्तिं कामप्याश्रित्य वर्तमानानां गुणकर्मादीनां द्रव्यादिषु यः सम्बन्धः स समवायः। द्रव्येषु गुणकर्मणी समवायेन वर्तेते। एवं द्रव्यत्वगुणत्वादिकं सामान्यं द्रव्यगुणादिषु सर्वदैव वर्तत इति तयोरपि सम्बन्धः समवायः। तन्तुप्रभृतिष्ववयवेषु पटादीनामवयविनां सम्बन्धोऽपि समवाय एव। एवम् एतैः सप्तभिः पदार्थैः सङ्घटितमिदं प्रपञ्चसर्वस्वमाकलयन्ति तार्किकप्रवेकाः।**

**टिप्पणी –**

गुणाः कर्माणि च केषुचिद् द्रव्येषु समवायसम्बन्धेन तिष्ठन्ति। तथैव द्रव्यत्वादिकम्। सर्वदा सामान्यमपि द्रव्यगुणकर्मसु समवायसम्बन्धेनैव वर्तते। स च समवायसम्बन्धः नित्यः। अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोश्च यः सम्बन्धः स समवायः।

**तर्कसारः**

**दूषणत्रितयरहितो धर्मो लक्षणम्। सन्ति लक्षणदूषणानि त्रीणि। अतिव्याप्ति अव्याप्ति असंभवसंज्ञकानि। तैरकलङ्कित एव धर्मो लक्षणम्।**

**तत्र तावदलक्ष्ये लक्षणस्य दर्शने अतिव्याप्तिर्नाम दोषः। यस्य लक्षणं विवक्षितं तल्लक्ष्यम्। तद्भिन्नमलक्ष्यम्। अतिव्याप्तेरुदाहरणं गोः शृङ्गित्वम् लक्षणमित्यस्मिन् संभवति। यदि गोर्लक्षणं शृङ्गित्वमुच्येत तदा अतिव्याप्तिर्लक्षणदोषः। शृङ्गित्वं हि लक्ष्यभूतगोभिन्ने महिषच्छागादावपि दृश्यते।**

**एवं लक्ष्यघटकेषु केषुचिल्लक्षणस्य सत्त्वं केषुचिदसत्त्वं च भवति चेत् अव्याप्तिर्लक्षणदोषः। यथा गोः नीलरूपवत्त्वम्।**

**असम्भवस्तु कुत्रापि लक्ष्ये लक्षणस्याविद्यमानत्वम्। यथा – गोरनुत्पाटितशफवत्त्वम्। वह्नेः शीतत्वं वा।**

**एतादृशदोषत्रयरहितस्तु धर्मो लक्षणं भवति। यथा गोः सास्नावत्त्वम्। सास्ना नाम गोर्गले लम्बमानो मांसपिण्डविशेषः। स गोष्वेव दृश्यते नान्येषु जन्तुषु। अतो न तस्यातिव्याप्तिः। अस्ति च सास्ना सर्वास्वपि गोव्यक्तिष्विति न वा तस्यास्ति अव्याप्त्यसंभवौ। एतादृश एव धर्मः स्थलान्तरेष्वपि लक्षणतया व्याह्रियत इति संक्षेपः।**

**टिप्पणी**

असाधारणधर्मो लक्षणमुच्यते। यस्य लक्षणमुच्यते तल्लक्ष्यम्। यत् लक्ष्यभिन्नं तत्सर्वमलक्ष्यम्। तथा हि यदि घटस्य लक्षणमुच्येत तर्हि घटः लक्ष्यः भवति तद्भिन्नं पटादिकमलक्ष्यञ्च। लक्षणे अतिव्याप्तिः अव्याप्तिः असंभवश्चेति दोषत्रयरहितत्वेनापि अवश्यं भाव्यम्।

एवं पूर्वोक्तमेतदतिव्याप्त्यव्याप्त्यसम्भवदूषणत्रयरहितो धर्मो लक्षणमिति स्पष्टम्। यथा गोः सास्नादिमत्त्वम्। सास्ना नाम गोः गले लम्बमानो मांसपिण्डविशेषः। स च सर्वास्वपि गोव्यक्तिष्वस्ति नेतरजीविषु। अतः सास्नादिमत्त्वं गोः लक्षणमिति उच्येत चेत् न तत्र अव्याप्तिरतिव्याप्तिरसम्भवो वा दोषः इति लक्षणसमन्वयः।



**द्रव्याणि**

**तर्कसारः -**

**द्रव्याणि नवधा विभज्यन्ते नैयायिकैः। कानि तानि? पृथिवी, जलम्, तेजः, वायुः आकाशम्, कालः, दिक्, आत्मा, मनश्च द्रव्याणि।**

**यद्यत् गन्धवदुपलभ्यते तत्सर्वं पृथिवीति कथ्यते। अतो मनुष्यशरीरादीनामपि पृथिव्यामन्तर्भावः। जलं प्रसिद्धमेव। उष्णस्पर्शवन्ति वह्निसूर्यप्रमुखाणि तेजांसि गण्यन्ते। शब्दस्य आश्रयभूतमाकाशं नाम द्रव्यमिन्द्रियागोचरमपि अनुमानगम्यम्। तदेवात्राकाशमिति परिगणितम्। तच्च सर्वत्र व्याप्नोति। अस्मिन् काले इदमुत्पद्यत इति,**

**अस्यां दिशीदं वर्तत इति च व्यवहारविषये कालदिगभिधाने वस्तुनि सर्वत्र विद्येते इति व्यवहारात्तयोः सिद्धिः। 'अह'मिति सर्वैरनुभूयमानो व्यवह्रियमाणश्च पदार्थ आत्मा इत्युच्यते। स च ज्ञानादीनामधिकरणं भवति। आत्मनि च न सर्वदा ज्ञानादिकं जायते। न हि सुषुप्तिकाले कोऽपि किमपि जानाति। एवं विधस्य ज्ञानानुत्पादस्य कारणं स्थलविशेषे मनस्सान्निध्यविरह एवेति वक्तव्यम्। अतो मनो नामकं द्रव्यं युक्तिभिरेव स्थापयितुं शक्यम्।**

**टिप्पणी –**

तार्किकाणां मते पृथिवी, जलम्, तेजः, वायुः आकाशम्, कालः, दिक्, आत्मा, मनश्चेति नवैव द्रव्याणि। तत्र गन्धवती पृथिवी। अतः गन्धवत्त्वात् अस्माकं शरीरादीनामपि पार्थिवत्वम्। शीतस्पर्शवत्य आपः (जलम्)। उष्णश्पर्शवत्तेजः। अग्निः विद्युत् जठराग्निः सुवर्णादयः मुख्याः तैजसविषयाः। शब्दस्य गुणत्वाच्छब्दः समवायसम्बन्धेन आकाशे अस्ति। अतः शब्दगुणकम् आकाशम् इति। अस्मिन् काले इदमुत्पद्यते इति व्यवहारहेतुः कालः, अस्यां दिशि इदं विद्यते इति व्यवहारात् प्राच्यादि व्यवहारहेतुः च दिक्।

**तर्कसारः**

**एषु च द्रव्येषु प्रथमानि पञ्च भूतपदेनाभिधीयन्ते। प्रथमे चत्वारो मनश्चेत्येतत्पञ्चकं मूर्तद्रव्यमिति। आकाशकालदिगात्मनो विभवः। यः सर्वत्र व्याप्यावतिष्ठते स विभुः।**

**द्रव्येषु चाकाशादयः पञ्च नित्या इति तेषां सिद्धान्तः। येषामुत्पत्तिर्विनाशश्च न विद्यते ते नित्याः। पृथिव्यादिचतुष्टयं त्वनित्यम्। तथापि पृथिव्यादीनामादिकारणभूताः परमाणवो नाम सूक्ष्मपदार्थाः उत्पत्तिविनाशरहिततया नित्या इति तार्किकैरभ्युपगतम्। प्रलयसमयेऽपि परमाणूनां नास्ति विनाशः। परमाणूनामनेकेषां संयोगवशात् स्थूलानि पृथिव्यादीन्युत्पद्यन्ते। विनाशे च तानि परमाणुं मर्यादीकृत्यैव विनश्यन्ति।**

**टिप्पणी –**

द्रव्येषु पृथिवी, जलं, तेजः, वायुः आकाशञ्च पञ्चभूतानीत्यभिधीयन्ते। तथा द्रव्येषु आद्याश्चत्वारः - पृथिवी, जलं, तेजः, वायुः अन्तिमः मनः च मूर्त्तद्रव्याणीत्युच्यन्ते। आकाशः कालः दिग् आत्मा च विभुद्रव्याणि। विभुर्नाम सर्वव्यापी।

तेषु नवद्रव्येषु आकाशः कालः, दिक्, आत्मा मनः च नित्यः। यस्य उत्पत्तिविनाशौ न स्तः स नित्यः। तार्किकाणां मते पृथिवी जलं तेजः वायुः चेति द्रव्यचतुष्टयमनित्यम् एव। किन्तु तेषां परमाणवः नित्याः। पृथिव्यादीनां परमाणुद्वयसंयोगे द्व्यणुकमुत्पद्यते। त्रिभि द्व्यणुकैः (षण्णां परमाणूनां संयोगात्) स्थूलपृथिव्यादीनि। एवमपि संयुक्तानां पृथिव्यादीनां परमाणूनां विभागेभ्यः स्थूलपृथिव्यादीनां द्रव्याणां

नाशः। किन्तु प्रलयेऽपि परमाणूनां विभागा एव संभवन्ति न तेषां नाशः। तथा हि नित्याः परमाणवः अवतिष्ठन्ते इत्यर्थः ।

**गुणाः**

**तर्कसारः**

**गुणस्तावद् रूपादयश्चतुर्विंशतिरिति तार्किकाः मन्यन्ते। यच्चक्षुषा गृह्यते यच्च वर्णपदेन लोके व्यवह्रियते तच्छुक्लादिभेदभिन्नं रूपम्। गुणेषु प्रथमं रूपं शुक्लं, नीलं, पीतं, रक्तं, हरितं, कपिशं चित्रमिति सप्तविधम् ।**

**टिप्पणी** –

तार्किकमतानुसारं चतुर्विंशति गुणाः। ते रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व- अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्काराः। पृथिव्यां सर्वं रूपं वर्तते। जलतेजसोस्तु शुक्लमात्रम् । जले वर्तमानमभास्वरं, तेजसि पुनः भास्वरमिति भेदः । यो अन्यं प्रकाशयति स भास्वरः ।

**तर्कसारः**

**रसो मधुरादि। रसस्तु मधुरः अम्लः, लवणः, कटुः, कषायः, तिक्त इति षोढा। गन्धस्पर्शौ प्रसिद्धावेव। संख्या एकत्वद्वित्वादिः। अणुत्वं महत्त्वमित्यादि परिमाणम्। परिमाणं चतुर्विधम् । अणुत्वं, महत्त्वं, ह्रस्वत्वं, दीर्घत्वं चेति। अयमस्मात्पृथगिति व्यवहारनिमित्तं पृथक्त्वं नाम गुणमपि तार्किका ऊरीकुर्वन्ति। संयोगविभागौ प्रसिद्धावेव। परत्वापरत्वे पुनः क्वचिद्दूरत्वसामीप्यरूपे भवतः।**

**टिप्पणी** -

गन्धः सुरभिरसुरभिश्चेति द्विधा। स च पृथिव्यामेव वर्तते। वस्त्वन्तरे गन्धप्रतीतिः जायेत चेत् पृथिवीसम्पर्कादेव जायेत। स्पर्शः शीतः उष्णः अनुष्णाशीतः इति त्रिधा। शीतस्पर्शो जले। उष्णस्तेजसि। पृथिव्यां वायौ चानुष्णाशीतस्पर्शः।

**तर्कसारः** –

**बुद्धिप्रभृतयः प्रयत्नान्ताः प्रसिद्धा एव। पतनहेतुर्गुरुत्वम्। स्रवणहेतुर्द्रवत्वम्। विशीर्णस्य वस्त्वन्तरस्य पिण्डीभावं जनयति यो गुणः स स्नेहशब्देनोच्यते। संस्कारो**

नामानुभवादुत्पद्यमानः कालान्तरे स्मरणायोपकुर्वाणश्च गुणः। स च आत्मनि वर्तते। संस्कारस्त्रिविधो भवति । वेगः, स्थितिस्थापकः, भावना च ।

इदानीं दृश्यमानं श्रूयमाणं वा किंचन वस्तु कमपि संस्कारमात्मनि जनयति। स कालान्तरे तस्य स्मरणं प्रति सहकारी संपद्यते। अदृष्टमिति धर्माधर्मयोः साधारणी संज्ञा। धर्मस्यैव पुण्यमिति नामान्तरम्। अधर्मस्य पापमिति च। तत्र धर्मः शास्त्रविहितकर्मानुष्ठानेन गङ्गास्नानादिना जायते। अधर्मो निषिद्धकर्माचरणेन सुरापानादिना जायते। शब्दः प्रसिद्ध एव। बुद्ध्यादिभावनान्ता इत्यनेन बुद्धि सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः गृह्यन्ते । इतरे गुणाः सामान्यगुणा इति व्यवह्रियन्ते । गुणेषु कतिपये विशेषगुणा इति कथ्यन्ते ।

रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः इति॥

**टिप्पणी –**

पिण्डीभावो नाम चूर्णादेः धारणाकर्षणहेतुभूतः विलक्षणः संयोगः। चूर्णम् आदिः यस्य सः चूर्णादिः मृत्तिकादिः। विहितकर्मजन्यः धर्मः । वेदविहितकर्मजन्यः धर्मः इति। निषिद्धकर्मजन्यः अधर्मः । वेदनिषिद्धकर्मजन्यः अधर्मः। एकत्वादिव्यवहारहेतुः संख्या । श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः गुणः शब्दः। सः ध्वन्यात्मकः, वर्णात्मकः चेति द्विविधः। बुद्धिप्रभृतयः- बुद्धिः, इच्छा, द्वेषः, प्रयत्नः च। सर्वव्यवहारहेतुर्गुणः बुद्धिः ज्ञानम् । इच्छा कामः, द्वेषः क्रोधः। प्रयत्नः कृतिः । बुद्धिः सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः च आत्ममात्रविशेषगुणाः।

## कर्माणि

**तर्कसारः**

**चलनात्मकः सर्वोऽपि व्यापारः तार्किकैः कर्मेति कथ्यते। उत्क्षेपणापक्षेपण आकुञ्चनप्रसारणगमनानीति पञ्च। उत्क्षेपणमूर्ध्वं नयनम्। अपक्षेपणं तद्विपरीतम्। अधो नयनमिति यावत्। प्रसारणं विततनम्। आकुञ्चनं तद्विरुद्धं कर्म। गमनं प्रसिद्धमेव। भ्रमणादिः गमने अन्तर्भवति। कर्मणोप्याऽधारो द्रव्यमेव। द्रव्ये कर्म समवायसम्बन्धेन वर्तते।**

**टिप्पणी –**

चलनात्मकत्वं कर्मणः लक्षणम्। उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनं चेति पञ्च कर्माणि। भ्रमण-रेचन- स्यन्दन-ऊर्ध्वज्वलनानां गमनेऽन्तर्भावः।

**सामान्यम्**

**तर्कसारः**

**समानावयवसंस्थानासु बहुषु व्यक्तिषु समानाकारप्रत्ययस्य कारणं सामान्यम् । गोव्यक्तिषु निखिलासु गोत्वात्मकं सामान्यं विद्यत इत्यत एव ‘इयं गौरियं गौरिति समानाकार प्रत्ययो जायते ।**

**तदिदं सामान्यं द्रव्यगुणकर्मसु त्रिषु समवायेन वर्तत इति तार्किकाः । द्रव्यत्वं, गुणत्वं कर्मत्वमित्येतेषां जातित्वं नैयायिकसम्मतमेव ।**

**टिप्पणी** –

बहुषु व्यक्तिषु समानतया वर्तमानः धर्मः सामान्यमिति । परमपरं चेति सामान्यं द्विविधम् ।

**समवायः**

**तर्कसारः**

**गुणादीनां द्रव्यादिषु कश्चिदस्ति सम्बन्धः स समवायः । गुणादीनां द्रव्यादिषु यः सम्बन्धः कश्चिदभ्युपगन्तव्यः स एव समवायः इत्युच्यते नैयायिकैः ।**

**टिप्पणी** –

गुणगुणिनोः क्रियाक्रियावतोः अवयवावयविनोः जातिव्यक्त्योः विशेषनित्यद्रव्ययोश्च यः सम्बन्धः सः समवायः इति तेषां सिद्धान्तः ।

**अभावः**

**तर्कसारः**

**नेति प्रतीतिविषयः कश्चिदस्ति सोऽपि पदार्थः । स तावदभाव इति नाम्ना व्यपदिश्यते । स च प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः इति चतुर्धा विभज्यते । आद्यानां त्रयाणां संसर्गाभावः इति साधारणी संज्ञा । उत्पत्तिशालिनां वस्तूनामुत्पत्तेः पूर्वं प्रतीयमानोऽभावः प्रागभावः । एवं विनाशिनां पदार्थानां विनाशादनन्तरमनुभूयमानोऽभावः प्रध्वंसाभावः । ‘अत्रेदं नास्ति’ इति प्रतीतिविषयोऽभावोऽत्यन्ताभावः । ‘गौरश्वो न’, ‘घटः**

**न पटः' इत्यादिप्रतीतिविषयोऽभावः अन्योन्याभावः ।**

**टिप्पणी** –

अभावस्य सप्तमपदार्थत्वं स्वीकुर्वन्ति तार्किकाः । स च प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः इति चतुर्विधः । प्रागभावस्य प्रध्वंसाभावस्य अत्यन्ताभावस्य च संसर्गाभावः इति सामान्यसंज्ञा ।

## पठनप्रवर्तनानि

- **पदार्थानां भेदान् नामानि च चार्ट् पत्रे विलिख्य प्रदर्शयतु ।**

  श्रद्धेयाः अंशाः -
  - दत्तानां सञ्चयः ।
  - दत्तानां विन्यासः ।

- **"अभावस्तु सर्वदैव वस्त्वन्तरसापेक्षः" चर्चां कृत्वा लघूपन्यासं लिखतु ।**

  श्रद्धेयाः अंशाः -
  - चर्चायां भागभाक्त्वम् ।
  - आशयानां स्पष्टता ।
  - तारतम्यम् ।
  - उपन्यासस्वरूपः ।

- **पदार्थविज्ञानमधिकृत्य सङ्गोष्ठीं प्रचालयतु ।**

  श्रद्धेयाः अंशाः -
  - सङ्गोष्ठीस्वरूपम् ।
  - आशयानां स्पष्टता ।
  - प्रस्तुतिः ।

- **कौ पुनः सामान्यविशेषौ, तयोः भेदः कः? सोदाहरणं लिखतु ।**

  श्रद्धेयाः अंशाः -
  - आशयव्यक्तता ।
  - आशयानां तारतम्यम् ।
  - भाषाशुद्धिः ।

- **आत्मनः मनसश्च भेदः अस्ति वा न वा? टिप्पणीं लिखतु।**

  श्रद्धेयाः अंशाः -
  - आशयानां स्पष्टता।
  - भेदप्रतिपादनम्।
  - भाषाशुद्धिः।

**प्रमा नाम यथार्थज्ञानं खलु? तर्हि तत् कथम् उत्पद्यते इति विषये चर्चां कुरुत।**

## अनुबन्धः

- पृथिव्यप्तेजोवायूनां परमाणवः, आकाशं, कालः, दिग्, आत्मा, मनः च नित्यद्रव्याणि।
- नाम्ना वस्तुसंकीर्तनम् उद्देशः ।
- द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
  समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ।। (कारिकावली)
- अथ गुणा रूपं रसो गन्धस्ततः परम्॥
  स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् ।
  संयोगश्चविभागश्च परत्वं चापरत्वकम्॥
  बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम्।
  द्रव्यत्वं स्नेहसंस्कारावदृष्टं शब्द एव च॥ (कारिकावली)
  (परिमितिः - परिमाणम्, अदृष्टम् - धर्माधर्मौ)
- उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा॥
  प्रसारणं च गमनं कर्माण्येतानि पञ्च च ।
  भ्रमणं रेचनं स्पन्दनोर्ध्वगमनमेव च ।
  तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ।। (कारिकावली)

पाठः - १०

# प्रमाणपरिचयः

**पाठप्रवेशः**

कस्माद् ज्ञानमुत्पद्यते ? इन्द्रियेभ्यः। अतः इन्द्रियाणि प्रमाणानीत्युच्यन्ते। तदेतत् प्रत्यक्षजन्यं ज्ञानमित्युच्यते नैयायिकैः।

**आमुखम्**

प्रमाणैः यथार्थज्ञानं जायते। भारतीयदर्शनेषु अष्टौ प्रमाणानि सन्ति। तानि प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिः अनुपलब्धिः संभवः ऐतिह्यं च। नैयायिकाः चत्वार्येव प्रमाणानि स्वीकुर्वन्ति। तानि प्रत्यक्षम् अनुमानम् उपमानं शब्दश्चेति। अस्मिन् पाठे प्रमाणान्यधिकृत्य पठामः।

**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।**

**प्रमाकरणं प्रमाणम्। प्रमा च यथार्थानुभवः। प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दं चेति यथार्थानुभवः चतुर्विधः। तेषां करणमपि चतुर्विधम्। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः च। अक्षस्याऽक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा। यदा सन्निकर्षः तदा ज्ञानं प्रमितिः। यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्। मितेन लिङ्गेन पश्चान्मानमनुमानम्। उपमानं सादृश्यज्ञानम्। शब्दः शब्द्यतेऽनेनार्थ अभिधीयते।**

**टिप्पणी**

भारतीयदर्शनेषु यथार्थज्ञानप्राप्त्यर्थम् उपयुक्तानि साधनानि प्रमाणानि इत्युच्यन्ते। प्रत्यक्षमेव

प्रत्यक्षज्ञानस्य करणम् अथवा साधनम्। एवम् अनुमानम् अनुमितेः उपमानम् उपमितेः शब्दं शाब्दबोधस्य च करणानि भवन्ति।

चक्षुरादीनामिन्द्रियाणां स्वस्वविषयं प्रति या प्रवृत्तिः संयोगो वा तत् प्रत्यक्षम्। विषयेन्द्रियसंयोगजन्यं ज्ञानं वा प्रत्यक्षम्। वृत्तिस्तु विषयेन्द्रियसंयोगः। तदा ज्ञानमुत्पद्यते। स एव प्रमितिः। ज्ञानात् दुःखस्य हानं सुखस्योपादानम्। हानादिबुद्धयः ज्ञानं विना न संभवन्ति। मितेन प्रमितिविषयेण लिङ्गेन पश्चात् मानमनुमानम् यथा वह्न्यादेः। प्रसिद्धगुणेन पदार्थेन उपमया वा प्रवृत्तमुपमानम् सादृश्यज्ञानम्। यथा गौरेवं गवयः। शब्द्यते ज्ञाप्यते अनेन इति शब्दः शक्त्यार्थोपस्थापकः।

**प्रत्यक्षम्**

**इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।**

**इन्द्रियस्यार्थेन सन्निकर्षात् उत्पन्नम् अव्यपदेश्यम्-शाब्दबोधातिरिक्तम् अव्यभिचारि – भ्रमातिरिक्तम् व्यवसायात्मकं – निश्चयात्मकं यद् ज्ञानं प्रत्यक्षम्। अक्षिणी प्रति प्रत्यक्षम्। अक्षाणि इन्द्रियाणि। इन्द्रियस्य अर्थेन संयोगात् उत्पन्नं यज्ज्ञानं तत्प्रत्यक्षम् इत्युच्यते। चक्षुषा रूपं गृह्यते। रसनया रसः गृह्यते। घ्राणेन गन्धः गृह्यते। श्रोत्रेण शब्दः गृह्यते। त्वचा स्पर्शः मनसा सुखदुःखादयः च गृह्यते। तदेतत् प्रत्यक्षज्ञानमित्युच्यते नैयायिकैः। 'आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्ष'मिति एषा न्यायशास्त्रसम्मता प्रत्यक्षप्रक्रिया।**







**टिप्पणी**

चक्षुः, रसना, घ्राणं, श्रोत्रं, त्वक् च पञ्च बाह्येन्द्रियाणि। मनस्तु अन्तरिन्द्रियम्। सर्वेषां ज्ञानानाम् अधिष्ठानं भवति आत्मा। एवम् इन्द्रियाणां पदार्थैः सह सम्बन्धेन जातं ज्ञानम् मनोद्वारा आत्मनि उत्पद्यते। तदेतत्प्रत्यक्षम् इत्युच्यते। मनो द्वारा सुखदुःखादयोऽपि आत्मनि जायन्ते। तस्मात् सुखदुःखादीनां ग्राहकतया मनः षष्ठम् इन्द्रियं कल्प्यते नैयायिकैः।

**अनुमानम्**

**अथ तत्पूर्वकं त्रिविधमनुमानम् – पूर्ववत् शेषवत् सामान्यतोदृष्टं च ।**

**प्रत्यक्षपूर्वकम् अनुमानम् । त्रिकालयुक्ता अर्थाः अनुमानेन गृह्यन्ते । तच्च लिङ्गलिङ्गिनोः सम्बन्धदर्शनानन्तरं लिङ्गदर्शनेन अप्रत्यक्षः अर्थः अनुमीयते ।**

**यत्र कारणेन कार्यम् अनुमीयते । यथा मेघोन्नत्या 'भविष्यत्कालिका वृष्टि' रनुमीयते ।**

**यत्र कार्येण कारणमनुमीयते । यथा नद्याः मलिनत्वपूर्णत्वशीघ्रत्वादिकं दृष्ट्वा 'तत्कारणभूता वृष्टि' रनुमीयते । धूमात् वह्न्यनुमानञ्च ।**

**लिङ्गलिङ्गिनोः सम्बन्धेऽप्रत्यक्षे केनचिदर्थेन सह लिङ्गस्य सामान्यात् अप्रत्यक्षो लिङ्गी अनुमीयते । यथा 'इच्छादिभिरात्मा ।'**

**तच्च अनुमानं 'स्वार्थं' 'परार्थं' चेति द्विविधम् । 'स्वानुमितिहेतुः स्वार्थम्' । 'परानुमितिहेतुः परार्थं' च । 'परार्थानुमानस्य पञ्चावयवत्वं' कथ्यते नैयायिकैः । ते पञ्च अवयवाः 'प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि' ।**

**टिप्पणी**

तत्पूर्वकमित्यत्र तच्छब्देन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं च गृह्यते । लिङ्गलिङ्गिनोः संबद्धयोर्दर्शनेन लिङ्गस्मृतिः जायते । स्मृत्या लिङ्गदर्शनेन अप्रत्यक्षः अर्थः अनुमीयते । प्रत्यक्षपूर्वकम् इत्यनेन प्रत्यक्षस्यानुमानकारणत्वमुक्तम् । तच्च अनुमानं त्रिविधम् - पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति ।

क) पूर्ववत् अनुमानम् - यत्र कारणं दृष्ट्वा कार्यम् अनुमीयते तत्र । यथा गगने मेघं दृष्ट्वा 'वृष्टिः भविष्यति' इति अनुमीयते ।

ख) शेषवत् अनुमानम् - यत्र कार्यं दृष्ट्वा कारणम् अनुमीयते तत्र । यथा नद्याः मलिनत्वं पूर्णत्वं शीघ्रतां च दृष्ट्वा 'ह्यः वृष्टिरभवत्' इति अनुमीयते । धूमात् वह्न्यनुमानञ्च ।







 

ग) सामान्यतो दृष्टम् – साध्यसाधनयोः संबन्धेऽप्रत्यक्षे सति लिङ्गस्य केनचिदर्थेन सह सादृश्यात् यत्र तेन लिङ्गेन अप्रत्यक्षं साध्यं साध्यते तत्र सामान्यतोदृष्टम्। यथा कर्त्रधिष्ठितम् एव कर्तर्यादिकं पटादिकं छिनत्ति। इदम् अस्माभिरनुभूतम्। एवमेव चक्षुरादीनि इन्द्रियाणि कर्त्रधिष्ठितानि इति अप्रत्यक्षमात्मानं बोधयेत्।

स्वस्य अनुमितिहेतुः स्वार्थानुमानम्। महानसे दिने दिने वह्निः दृश्यते धूमोऽपि दृश्यते। तेन धूमवह्न्योः कश्चन सम्बन्धः अस्तीति प्रतीयते। स च सम्बन्धः व्याप्तिरित्युच्यते। हेतुना साध्यस्य सहभावः एव तयोः व्याप्तिः। तां व्याप्तिं गृहीत्वा अन्यत्र गच्छन् क्वापि पर्वते धूमं पश्यति। यत्र धूमस्तत्राग्निरिति पूर्वानुभवं स स्मरति। तदनन्तरं अत्रास्ति वह्निव्याप्यः धूमः अथवा वह्निसहचरितः धूमः। ततश्च अत्र पर्वते वह्निरस्तीति निश्चिनोति।

परानुमितिहेतुः परार्थानुमानम्। यत्र कोऽपि पुरुषः स्वयं धूमादग्निम् अनुमाय परं तमर्थं बोधयितुं वाक्यपञ्चकं प्रयुङ्क्ते तत्परार्थानुमानम्। तानि च पञ्च वाक्यानि – प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि।

**उपमानम्**

**प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्।**




**प्रसिद्धेन सादृश्यात् साध्यस्य साधनम् उपमानम्। यथा दृष्टेन गवा यत् सादृश्यं तस्मात् साध्यस्य गवयस्य अवधारणं तद् उपमानम्। तथाहि 'गो सादृशो गवयः' इति श्रवणानन्तरं वनं गतः पुरुषः गोसदृशं जीविनं दृष्ट्वा अयं गवयपदवाच्यः गोसदृशत्वात् इत्यवधारयति। एवं प्रसिद्धसाधर्म्यात् गवय-गवयशब्दयोः वाच्यवाचकभावसम्बन्धः येन प्रमाणेनावधारयति तदुपमानम्।**

## टिप्पणी

गवयपदार्थमजानन् पुरुषः 'गोसदृशो गवयः' इति कस्यचन ग्रामीणस्य वचनं श्रुत्वा वनं गतः। अनन्तरं वने कञ्चन गोसदृशं जीविनं पश्यति। तदा ग्रामीणस्य 'गोसदृशो गवयः' इति वचनं स्मरति। तत्स्मरणानन्तरं तस्य अयं गवयपदवाच्यः इति संज्ञासंज्ञिसम्बन्धज्ञानं जायते। तदेतदुपमितिः। तत्करणं सादृश्यज्ञानं उपमानञ्च।

**शब्दः**

**आप्तोपदेशः शब्दः।**

**आप्तो नाम यथार्थवक्ता। आप्तस्य यथार्थज्ञानेन साक्षात्कृतपदार्थस्य यस्तद्विषयक उपदेशः स शब्दः प्रमाणम्। स द्विविधम् - दृष्टार्थोऽदृष्टार्थश्च। दृष्टार्थो - यथा लोके प्रतिपाद्योऽर्थः वैद्योपदेशादयः, अदृष्टार्थो यथा 'ज्योतिष्ठोमेन स्वर्गकामो यजेत' इत्यादयः।**




## टिप्पणी

आप्तः च अनुभवेन वस्तुतत्त्वस्य कात्स्न्र्येन निश्चयवान् रागादिवशादपि न अन्यथावादी। यथार्थज्ञानेन प्रत्यक्षीकृतः पदार्थधर्मः येन स साक्षात्कृतधर्मा। पदार्थः येन वास्तविकरूपेण ज्ञातः तेनैव रूपेण परं प्रति तस्यार्थस्य वक्तुमिच्छया प्रयुक्तः प्रेरितः य उपदेष्टा स आप्तः।

आप्तस्य उपदेशः आप्तोपदेशः। स शब्दः। दृष्टार्थः अदृष्टार्थः चेति शब्दः द्विविधः। यस्य अर्थः प्रत्यक्षेण ज्ञातुं शक्यते स दृष्टार्थः शब्दः अथवा दृष्टफलकः। लोके प्रतिपाद्याः अर्थाः वैद्यानाम् उपदेशाः च दृष्टफलकस्य उदाहरणं भवति। यस्य अर्थः प्रत्यक्षेण ज्ञातुं न शक्यते स अदृष्टार्थः शब्दःअथवा अदृष्टफलकः। ज्योतिष्टोमेन स्वर्गकामो यजेत इत्याद्युपदेशाः अदृष्टफलकाः भवन्ति।

## पठनप्रवर्तनानि

- **चर्चां कृत्वा प्रत्यक्ष-अनुमान-उपमान-शब्दान् अधिकृत्य कक्ष्यायां प्रस्तौतु।**

श्रद्धेयाः अंशाः –
- चर्चायां भागभाक्त्वम् ।
- आशयानां स्पष्टता ।
- प्रस्तुतिः ।

- **अधोनिर्दिष्टान् विशदीकृत्य लघुटिप्पणीं लिखतु ।**

**क) प्रत्यक्षम्  ख) अनुमानम्  ग) उपमानम्  घ) शब्दः**
**ङ) पञ्चेन्द्रियाणि  च) पञ्चावयववाक्यम्**

श्रद्धेयाः अंशाः –
- आशयानां स्पष्टता ।
- आशयानां विवेचनम् ।
- भाषाशुद्धिः ।

- **अधोदत्तानि कस्य प्रमाणस्य उदाहरणानि इति विविच्य लिखतु ।**

1. वृष्टिर्भवत्याकाशे जलददर्शनात् ।
2. शारिकां पश्यति ।
3. उष्णोदकेन शिरःप्रक्षालनं मा कुरु ।
4. गोसदृशो गवयः ।
5. घण्टानादं श्रृणोति ।
6. गतिमानादित्यो पूर्वस्यां दृष्टस्येदानीं पश्चिमायां दिशि दर्शनात् ।
7. ज्योतिष्टोमेन स्वर्गकामो यजेत ।

श्रद्धेया अंशाः –
- विषयज्ञानम् ।
- विवेचनपटुता ।

- **अनुमानोपमानशब्दानां नूतनानि उदाहरणानि समाहृत्य लिखतु ।**

श्रद्धेया अंशाः –
- दत्तसञ्चयः ।
- दत्तानां क्रमीकरणम् ।

**अभ्यासप्रश्नाः**

१. द्रव्येषु एते अन्तर्भवन्ति .................. ।

A. तेजः, जलं, कालः, आकाशम्
B. गुणः, कर्म, सामान्यं, विशेषः
C. रूपं , रसः, गन्धः , स्पर्शः
D. संख्या, परिमाणम्, स्नेहः, शब्दः

२. विशेषनित्यद्रव्ययोः यः सम्बन्धः स ....................

A. सामान्यम्
B. विशेषः
C. समवायः
D. अभावः

३. अधोदत्तयोः प्रस्तावनयोः का साधुः ? समीचीनं विकल्पं चित्वा लिखतु ।

क) अप्रसिद्धेन अर्थेन सादृश्यात् उत्पन्नं ज्ञानम् उपमानम् ।

ख) इन्द्रियस्य अर्थेन संयोगात् उत्पन्नं ज्ञानं प्रत्यक्षम् ।

A. क) साधुः
B. ख) साधुः
C. क) ख) च साधुः
D. क) ख) च असाधुः

४. अधोदत्तं प्रस्तावनाद्वयं पठित्वा समीचीनं विकल्पं चित्वा लिखतु ।

क) प्रत्यक्षपूर्वकम् अनुमानम् ।

ख) धूमं दृष्ट्वा वह्निरनुमीयते ।

A. ख) क) इत्यस्य कारणं भवति ।
B. ख) क) इत्यस्य व्यतिरेकः ।
C. ख) क) इत्यस्य उदाहरणम् ।
D. क) ख) इत्येतयोः मिथः सम्बन्धः नास्ति ।

५. कः गणे न अन्तर्भवति ?

चक्षुः, रसना, घ्राणः, पादः, त्वक् ।

६ क्रमीकृता श्रेणी का ?

A) उपनय-हेतु-उदाहरण-प्रतिज्ञा-निगमनानि ।

B) उदाहरण- निगमन-उपनय-हेतु-प्रतिज्ञाः ।

C) प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि ।

D) हेतु-निगमन-उपनय-प्रतिज्ञा-उदाहरणानि ।

## अनन्तनारायण शास्त्रि

पञ्चाशीत्युत्तर अष्टशताधिकसहस्रतमे ख्रीष्टाब्दे पालक्काट् मध्ये पुतुक्कोट्देशे नारायणिअम्मा इत्यस्याः मातुः सीतारामय्यर्नामकस्य तृश्शूर् शिला न्यायमञ्चस्य प्राड्विवाकस्य पितुः च पुत्रत्वेन जाताः पि. एस्. अनन्तनारायणशास्त्रिणः। अयं प्रथितयशसः पिच्चुशास्त्रिणः अनुजः। विद्यालये आङ्गलभाषां संस्कृतभाषां च अपठत्। पुतुक्कोड् रामशास्त्रिणः तर्कशास्त्रं एडमन नम्पूतिरिप्पाट्महोदयाद् दिनकरीयं वाटानम्कुरिश्शि नारायणशास्त्री इत्यतः वेदान्तभाष्यं च अधीतवान्। पुन्नशेरि नम्पिनीलकण्ठशर्मा इत्येतेभ्यः पण्डितश्रेष्ठेभ्यः व्याकरणं ज्योतिषं वैद्यम् इत्येतानि आर्. वि. कृष्णमाचार्यर् इत्यतः महापण्डितात् व्याकरणञ्च अधीतमनेन।

आगंलभाषायामनेन प्राप्तं पाण्डित्यं निस्तुलम्। ततः 'हिन्दु'दिनपत्रे ग्रन्थनिरूपणम् अनेन निरूढम्। एरणाकुलं नगरे विद्यमाने महाराजास् महाविद्यालये संस्कृताध्यापकः आसीत्। कोकिलसन्देशस्य व्याख्या, वाक्यतत्त्वं, तर्कसारः, बालरामायणम्, तृक्कण्डियूर् अच्च्युतप्पिषारटिमहाशयेन कृतस्य प्रवेशकस्य लघुविवृत्तिः, शुकसन्देशस्य टिप्पणी च पण्डितवरेण्यस्य अस्य मुख्यकृतयः। अस्य वाक्यतत्त्वं नाम ग्रन्थः पदरचनां वाक्यस्यघटनां चाधिकृत्य अस्मान् बोधयति। तर्कशास्त्रस्य मौलिकानि तत्त्वानि सरलया भाषया सामान्यजनानां मनः प्रापयितुं अनेन कृतो यत्नः एव तर्कसारो नाम ग्रन्थतल्लजः।

पण्डितश्रेष्ठोऽयं सप्तचत्वारिंशदुत्तरनवशताधिक सहस्रतमे अस्माकं राष्ट्रस्य स्वाधीनताप्राप्तिसंवत्सरे दिवमगात्।पश्चादनेनपण्डितराजइतिबिरुदंकीर्त्तिमुद्राञ्चप्राप्तम्।एकोनविंशशतेवर्षेपूर्णवेदपुरीस्थविद्वत्सदसः सम्मानमनेन प्राप्तम्।

## ബാലപ്രബോധനം

വെള്ളം ജടാന്തേ ബിഭ്രാണം
വെള്ളിമാമലവിഗ്രഹം
വെള്ളൂരമർന്ന ഗൗരീശ-
മുള്ളിലൻപൊടു ചിന്തയേ! (1)

കർതൃകർമ്മക്രിയാഭേദം
വിഭക്ത്യർത്ഥാന്തരങ്ങളും
ഭാഷയായിഹ ചൊല്ലുന്നേൻ
ബാലാനാമറിവിന്നഹം (2)

ശബ്ദം രണ്ടുവിധം പ്രോക്തം
തിങന്തഞ്ച സുബന്തവും
രണ്ടു ജാതി സുബന്തേ ചാ-
പ്യജന്തം ച ഹലന്തവും. (3)

ലിംഗം മുമ്മൂന്നു രണ്ടിന്നും
വരും പുല്ലിംഗമാദിയിൽ
സ്ത്രീലിംഗം മദ്ധ്യഭാഗേ സ്യാ-
ദൊടുക്കത്തു നപുംസകം. (4)

വൃക്ഷോ ജായാ കുണ്ഡമിതി
രൂപഭേദമജന്തകേ
ഗോധുക് പൂർവ്വമുപാനച്ച
വാർശബ്ദോപി ഹലന്തകേ. (5)

അന്തങ്ങളറിയാമിത്ഥം
പ്രഥമൈകവചനങ്ങളാൽ,
അജന്തേഷു, ഹലന്തേഷു
ബഹ്വർത്ഥവചനങ്ങളാൽ. (6)

അകാരാന്താദിയായുള്ള
ശബ്ദങ്ങൾക്കു യഥോചിതം
വിഭക്തിഭേദാദർത്ഥങ്ങൾ
ചൊല്ലുന്നു പല ജാതിയും (7)

പ്രഥമാ ച ദ്വിതീയാ ച
തൃതീയാ ച ചതുർത്ഥ്യപി
പഞ്ചമീ ഷഷ്ഠിയും സപ്ത-
മ്യേവമേഴു വിഭക്തികൾ (8)

ഇവറ്റിന്നിഹ വെവ്വേറെ
മുമ്മൂന്നു വചനം വരും
ഏകദ്വിബഹുമുമ്പായി
വചനം മൂന്നിഹ ക്രമാൽ (9)

ഒരുത്തനിരുപേർ പിന്നെ-
പ്പലരെന്നർത്ഥമായ് വരും.
പ്രഥമായാ ഭേദമത്രേ
മുറ്റും സംബോധനാഭിധാ (10)

അതെന്നു പ്രഥമയ്ക്കർത്ഥം
ദ്വിതീയയ്ക്കതിനെപ്പുനഃ
അതിനോടതിലേയ്ക്കെന്നും
ദ്വിതീയയ്ക്കർത്ഥമായ് വരും (11)

തൃതീയാ ഹേതുവായിട്ടു
കൊണ്ടാലോടൂടെയെന്നപി.
ആയിക്കൊണ്ടു ചതുർത്ഥീ ച
സർവ്വത്ര പരികീർത്തിതാ (12)

അതിങ്കൽനിന്നുപോക്കെക്കാൾ
ഹേതുവായിട്ടു പഞ്ചമി.
ഇക്കുമിന്നുമുടെ ഷഷ്ഠി-
ക്കതിന്റെ വെച്ചുമെന്നപി (13)

അതിങ്കലതിൽവെച്ചെന്നും
വിഷയം സപ്തമീ മതാ.
വിഭക്ത്യാർത്ഥങ്ങളീവണ്ണം
ചൊല്ലുന്നൂ പലജാതിയും (14)

വൃക്ഷസ്തിഷ്ഠത്യസൗ വൃക്ഷം
നിൽക്കുന്നു; വൃക്ഷമാശ്രയേ,
വൃക്ഷത്തെയാശ്രയിക്കുന്നേൻ;
വൃക്ഷേണ ദ്വിരദോ ഹതഃ. (15)

വൃക്ഷത്താലാന കൊല്ലപ്പെട്ടി
ന്നീ വണ്ണം തൃതീയയും;
നമശ്ചകാര വൃക്ഷായ
ശാഖാസംരുദ്ധഭാസ്വതേ. (16)

നമസ്കരിച്ചേൻ വൃക്ഷത്തി
ന്നായിക്കൊണ്ട് ചതുർത്ഥ്യപി;
വൃക്ഷാഗ്രാത് കുസുമം ഭ്രഷ്ടം,
വൃക്ഷാഗ്രത്തിങ്കൽ നിന്നഥ (17)

പൂവീണെന്നഥ വൃക്ഷസ്യ
ശാഖാ ചാത്യന്തമുന്നതാ,
വൃക്ഷത്തിന്റെ കൊമ്പുമേറ്റ
മുയർന്നെന്നതു ഷഷ്ഠ്യപി (18)

പക്ഷീ വൃക്ഷേ സ്ഥിതഃ, പക്ഷി
വൃക്ഷത്തിങ്കലിരുന്നിതു
ഹേ വൃക്ഷ, ത്വം കമ്പസേ,
കിമിതി സംബോധനാപി ച (19)

എടോ വൃക്ഷം നീ ചലിക്കുന്ന
തെന്തിതീവണ്ണമൊക്കവേ;
സംബോധനാ നിർണ്ണയാർത്ഥം
ഹേ ശബ്ദം കൂടെ യുജ്യതേ (20)

പദച്ഛേദം ചെയ്തു മുൻപേ
വിഭക്തികളറിഞ്ഞുടൻ (21)

അങ്ങുമിങ്ങുമിരിക്കുന്ന
പദങ്ങളെ യഥാവിധി
ചേരുന്ന പടി ചേർക്കുന്ന-
തന്വയം പരികീർത്തിതം.(22)

കർത്താ കർമ്മം ക്രിയാ
മൂന്നുമന്വയത്തിങ്കൽ മുമ്പിവ
കർത്താ ചെയ്യുന്നവൻ കർമ്മ-
മവനിച്ഛിച്ചതായ് വരും.(23)

കർത്താവിന്നിഹ കർമ്മത്തോടു-
ള്ള ബന്ധം ക്രിയാപദം
കർത്താ പ്രഥമയാകുമ്പോൾ
ദ്വിതീയാ കർമ്മമായ്‌വരും.(24)

തിങന്തം ക്രിയയായീടും
ചിലേടത്തു സുബന്തവും
തൃതീയ കർത്താവാകുമ്പോൾ
കർമ്മം പ്രഥമയായ്‌വരും(25)

സുബന്തം വാ തിങന്തം
വാ ക്രിയാ തത്രാത്മനേപദം
തൃതീയാ കർത്താവായീടും
ഭാവേ കർമ്മങ്ങളില്ലപോൽ.(26)

സുബന്തം താൻ തിങന്തം താന-
തിങ്കൽ ക്രിയയായ് വരും

കർത്താവിലഥ കർമ്മത്തി
ലഥ ഭാവത്തിലും തഥാ (27)

മൂന്നുജാതിവരും തത്ര
ചൊല്ലാം കർത്താവിലുള്ളത്:
കിരാതോ ഹരിണം ജഘ്നേ,
കർത്തൃകർമ്മക്രിയാഃ ക്രമാത്.(28)

കിരാതൻ മാനിനെക്കൊന്നു,
കിരാതേന മൃഗോ ഹതഃ,
കിരാതനാൽ മൃഗം കൊല്ല
പ്പെട്ടു,വെന്നിതു കർമ്മണി,(29)

താമ്രചൂഡൈരകൂജീതി,
നൽപ്പൂങ്കോഴികളാലിഹ
കൂകുന്നെന്നുള്ളതുണ്ടായീ
ഭാവത്തിങ്കലിവണ്ണമാം.(30)

കാണുന്നിതേകവചനം
ഭാവത്തിങ്കൽ ക്രിയാപദം
സുബന്തംക്രിയയാകുമ്പോൾ
ഭാവത്തിങ്കൽനപുംസകം.(31)

വിശേഷേണ വിശേഷങ്ങ-
ളറിഞ്ഞീടുക സർവ്വതഃ
വിശേഷ്യം തു പ്രധാനം സ്യാദ്
അപ്രധാനം വിശേഷണം (32)

വിശേഷ്യം ബ്രഹ്മചാരീ തു
മേഖലാജിനദണ്ഡവാൻ
മേഖലാജിനദണ്ഡങ്ങ
ളുള്ളവൻ തദ് വിശേഷണം.(33)

ഗോപാലോ ഗാം പയോ ദോഗ്ധി
യെന്നീവണ്ണം ദ്വികർമ്മകം
ഗോപാലൻ പശുവേ പാലെ
ക്കറക്കുന്നിപ്രകാരമാം.(34)

സൂര്യേ കർക്കിസ്ഥിതേ നാരീ
പ്രാസൂയത കിലാത്മജം
സൂര്യൻ കർക്കടകേ നിൽക്കും
വിഷയത്തിങ്കലംഗനാ (35)

പെറ്റു പോൽ മകനേ ചൊന്നേ-
നേവം വിഷയസപ്തമീ.

ക്രിയാവിശേഷണം ചൊല്ലാം
രാമസ്സാദരമബ്രവീത് (36)

ശ്രീരാമനാദരത്തോടുകൂടും
വണ്ണം പറഞ്ഞിത്.
ധാതു രണ്ടു വിധം പ്രോക്തം
സകർമ്മകമകർമ്മകം(37)

കൃഷ്ണോ ദിദേവ ശ്രീകൃഷ്ണൻ
ക്രീഡിച്ചെന്നതകർമ്മകം
ശ്രീകൃഷ്ണോപാലയദ്ഗാഃ
കൃഷ്ണൻ പാലിച്ചു ഗോക്കളെ (38)

സകർമ്മകമിദം പ്രോക്തം
തിങന്താംശ്ച ബ്രവീമ്യഹം.(39)

ലട്ടും ലങ്ങും ലോട്ടും ലിങ്ങും
ലിട്ടും ലുങ്ങും തഥൈവ ച
ലൃട്ടും ലൃങ്ങും ലൃട്ട് ലോട്ടും
ലകാരം പത്തിവ ക്രമാൽ.(40)

ആശീർലിങ്ങ് ലിങ്ങിലേ
ഭേദം കാലഭേദമഥോച്യതേ
ലട്ടിയക്കത്തിൽ വന്നീടും
ലങ്ങ് ലുങ്ങ് ലിട്ടുകൾ പോയതിൽ (41)

ചെയ്ക പോക വരൂതാക
എന്നിത്യാദിഷു ലിങ്ങ് ച ലോട്
ലൃങ്ങ് ലൃട്യേ ലുട്ടു മൂന്നും
മേൽവരുന്നുള്ളവയിൽ ക്രമാൽ.(42)

നാനാധാതുഗണത്തിന്റെ
മേൽവരുന്നു ലഡാദയഃ
ഭൂസത്തായാമേധവൃദ്ധൗ
ഡുപചഷ്പാക ഏവ ച (43)

ലകാരത്തിന്നു രൂപങ്ങൾ
ഈ രണ്ടാം ധാതുഭേദതഃ
പരസ്മൈപദവും പിന്നെ
ആത്മനേപദവും തഥാ (44)

ഓരോന്നാകിലുമാം പിന്നെ
ചിലേടത്തു യഥാവിധി
ഓരോന്നിഹ വെവ്വേറെ
വർഗ്ഗം മുമ്മൂന്നു വന്നിടും.(45)

പ്രഥമഃ പുരുഷഃ പൂർവ്വം
മദ്ധ്യമ പുരുഷഃ പുനഃ
ഉത്തമഃ പുരുഷശ്ചേതി
വർഗ്ഗം മൂന്നിവ രണ്ടിലും (46)

ഓരോന്നിന്നിഹ വെവ്വേറെ
മുമ്മൂന്നു വചനം വരും
ഏകദ്വിബഹുമുമ്പായി
വചനം മൂന്നിവ ക്രമാൽ (47)

മദ്ധ്യമൻ വരുമേടത്ത്
യുഷ്മത്തുകൾ വരും ക്രമാൽ
ഉത്തമൻ വരുമേടത്തങ്ങ-
സ്മത്തുകൾ വരുന്നിതു (48)

മറ്റുള്ളേടത്തു പ്രഥമ
പുരുഷൻ വരുമെപ്പോഴും
സഃ കരോതി, ത്വം കരോഷി,
കരോമ്യഹമിതിക്രമാൽ.(49)

അവൻ ചെയ്യുന്നു, നീ ചെയ്യുന്നു,
ഞാൻചെയ്യുന്നു ഇതി ക്രമാൽ.
കുർവ്വന്തി തേ, തൗ കുരുതഃ,
സഃ കരോതി യഥാക്രമം (50)

തന്റെ തന്റെ സമത്തോടു
കൂടുമത്രേ വിഭക്തികൾ
വചനങ്ങളുമവ്വണ്ണം
തഥാ ലിംഗങ്ങളും വരും (51)

കൃഷ്ണഃ കമലപത്രാക്ഷഃ
കൃഷ്ണം കമലലോചനം,
കൃഷ്ണേന വാസുദേവേന,
കൃഷ്ണായ പരമാത്മനേ,(52)

കൃഷ്ണാൽ കമലപത്രാക്ഷാൽ,
കൃഷ്ണസ്യ കമലാപതേഃ,
കൃഷ്ണേ കമലപത്രാക്ഷേ,
ഹേ കൃഷ്ണ പുരുഷോത്തമ!(53)

കൃഷ്ണഃ കമലപത്രാക്ഷഃ,
കൃഷ്ണൗ കമലലോചനൗ,
കൃഷ്ണാഃ കമലപത്രാക്ഷാഃ
വചനങ്ങളിവണ്ണമാം. (54)

വൃക്ഷഃ കുസുമിതഃ, കാന്താ
പൂർണ്ണചന്ദ്രനിഭാനനാഃ
വനം കുസുമിതം ഭാതി,
ലിംഗഭേദങ്ങളിങ്ങനെ (55)

യച്ഛബ്ദം കാണുമേടത്ത്
തച്ഛബ്ദം കൂടെ വന്നിടും
ക്രിയാപദം രണ്ടും മൂന്നും
കാണുന്നേടത്തിവണ്ണമാം. (56)

ക്രിയയ്ക്കടുത്ത കർത്താവും
കർമ്മവും തത്ര കൊൾവിത്
ദ്വിതീയയ്ക്കും സപ്തമിക്കും
പിമ്പേ ക്ത്വാന്തം ല്യബന്തവും (57)

തത്ര ഗത്വാ പ്രവിശ്യേതി
തം ദൃഷ്ട്വാ പ്രേക്ഷ്യചേത്യപി.
രണ്ടു കർമ്മങ്ങളുണ്ടാകിൽ
നടുവേ സ്യാൽ ല്യബന്തവും (58)

വിദർഭവിഷയം പ്രാപ്യ
രുക്മിണീമഹരൽ പ്രഭുഃ
പ്രാപ്യ,സംഗമ്യ, സത്കൃത്യ,
പ്രേക്ഷ്യേത്യാദി ല്യബന്തവും. (59)

ക്ത്വാന്താഃ കൃത്വാ ച ഹത്വാ ച
നത്വാ ഗത്വാദികാസ്തഥാ
നത്വാ നമസ്കരിച്ചിട്ട്
വീക്ഷ്യ കണ്ടിട്ടിതീദൃശം (60)

വക്തും ശ്രോതും ഗ്രഹീതും വാ
തുമുന്നന്തങ്ങളേവമാം
ചതുർത്ഥ്യർത്ഥമിവറ്റിനും
തസിലന്തം യതസ്തതഃ (61)

രാജതോ വിപ്രതശ്ചേതി
പഞ്ചമ്യർത്ഥമിവറ്റിനും
കുർവ്വൻ കുർവാണയിത്യേവം
ശത്രന്തം ശാനജന്തവും (62)

ചെയ്കിയങ്ങുന്നുവെന്നേവ-
മർത്ഥഭേദമുദീരിതം
അവ്യയങ്ങളഥോച്യന്തേ
ക്ത്വാന്താശ്ചൈവ ല്യബന്തകാഃ (63)

തസ്സിലന്താസ്തുമുന്നന്താശ് -
ശനൈരുച്ചൈസ്തഥാധുനാ
അഥാഥോ തദനു ക്ഷിപ്രം
യർഹി തർഹി ച കർഹി ചിത് (64)

യദി ചേത് ബതഹന്തേതി
തുഹി ച സ്മഹവൈ പുനഃ
യദാ തദാ കഥാ ബ്രൂയാൽ
പ്രായശ്ശശ്വത് സ്ഫുടം ദ്രുതം (65)

അഹോ പൃഥക് വൃഥാ ശീഘ്രം
തത്ര യത്രാത്ര കുത്രചിത്.
ഇത്ഥം നനുദ്ധ്രുവം ചിത്ര
മപി ഖല്വേവമേവനു (66)

യഥാതഥാകഥം നാമ
ചിത്ചനാന്താദികക്രമാൽ (67)

കർത്താവിൽ ക്രിയയായാകുമ്പോൾ
കർത്താ പ്രഥമയായ്വരും
കർമ്മം ദ്വിതീയയായിടും
രക്ഷസ്വത്സ്മാൻ മഹേശ്വരഃ (68)

കർമ്മത്തിൽ ക്രിയയാകുമ്പോൾ
കർത്താവങ്ങു തൃതീയയാം
കർമ്മം പ്രഥമയായിടും
കൃഷ്ണേനാധാരി പർവ്വതഃ (69)

ഭാവത്തിൽ ക്രിയയാകുമ്പോൾ
കർത്താവങ്ങു തൃതീയയാം
കർമ്മമില്ലെന്നു കാണേണം
കൃഷ്ണേനാഭാവി ഗോകുലേ (70)

കർത്തര്യേവ പരസ്മൈപദമിതി
ന ച ഭാവകർമ്മണോഃ
ജ്ഞേയം ത്രിഷ്വാത്മനേപദം സ്യാത്
ഭാവേ പ്രഥമൈകവചനമേവ പുനഃ (71)

സുബന്തം ക്രിയ ചൊല്ലുന്നേൻ
ബഭൂവാൻ ഭൂതവാനഥ
ഭൂതോ ഭവ്യസ്ത്വേ ധനീയോ
ഭവിതവ്യ ഇതി തൃഷു (72)

പൂർവ്വകാല ക്രിയാ സ്തേതാഃ
കൃത്വാ പ്രാപി വിധായ ച
പായം പായം ശനൈഃ കാര-
മപി കർത്തും പ്രയോജനം. (73)

ഔചിത്യം കൊണ്ടറിഞ്ഞീടു-
കർത്ഥഭേദങ്ങളൊക്കവേ
നവാരണ്യമഹീദേവ
കൃതിരേഷാ വിരാജതേ. (74)